केरलपाठावलिः

# संस्कृतम्

## दशमी कक्ष्या

संस्कृतविद्यालयानां कृते

KERALA READER

# SANSKRIT

STANDARD

X

FOR SANSKRIT SCHOOLS ONLY

Government of Kerala
Department of General Education

State Council of Educational Research and Training
(SCERT), Kerala
2025

## राष्ट्रगीतम्

जन गण मन अधिनायक जय हे,
भारतभाग्यविधाता ।
पंजाब सिंध गुजरात मराठा,
द्राविड़ उत्कलबंगा ।
विंध्य हिमाचल यमुना गंगा
उच्छलजलधितरंगा ।
तव शुभ नामे जागे
तव शुभ आशिष मागे
गाहे तव जय गाथा ।
जनगणमङ्गलदायक जय हे
भारतभाग्यविधाता ।
जय हे जय हे जय हे
जय जय जय जय हे !

## प्रतिज्ञा

भारतं मम राष्ट्रम् । सर्वे भारतीयाः मे भ्रातरः । अहं मम राष्ट्रे स्निह्यामि। तस्य समृद्धायां नानाविधायां च पूर्विकसम्पत्तौ अभिमानी च भवामि । तद्योग्यतां सम्पादयितुं सदा यतिष्ये च । अहं पितरौ गुरूंश्चादरिष्ये बहुमानयिष्ये च । विनयान्वित एवाहं सदा सर्वैः सह व्यवहरिष्ये, सर्वेषु प्राणिषु दयालुर्वर्तिष्ये च । मम राष्ट्राय राष्ट्रियेभ्यश्चाहं समर्पये स्वसेवाम् । राष्ट्रियाणां योगक्षेमैश्वर्येषु एव अहम् आत्मनः तोषं कलयामि ।


**Prepared by:**

**State Council of Educational Research and Training (SCERT)**
Poojappura, Thiruvananthapuram 695012, Kerala
Website: www.scertkerala.gov.in
email: scertkerala@gmail.com
Phone:0471-2341883, fax:0471-231869
Typesetting and Layout: SCERT
First Edition: 2025
Printed at: KBPS, Kakkanad, Kochi-30
**Department of General Education, Government of Kerala**

प्रियच्छात्राः

दशमकक्ष्यायाः पौरस्त्यभाषापठनार्थं सज्जीकृतमिदं संस्कृतपाठ्यपुस्तकं भवतां पुरतः प्रस्तूयते। काव्यं, विवरणं, रूपकं, उपन्यासः, शास्त्रम् इत्यादिभिः व्यवहाररूपैः सह वृत्तालङ्कारव्याकरणविशेषाणां च पठनं विभाव्य आसूत्रितं भवतीदं पाठ्यपुस्तकम्।

राष्ट्रिय-कौशल-योग्यता-प्रारूपम् (National Skill Qualification Frame work), विज्ञान विनिमयोपाध्यश्च (ICT) पाठ्यपुस्तकेऽस्मिन् परिगणिताः सन्ति।

स्वतन्त्रवाचनाय, स्वतन्त्रचिन्तायै, सर्गाविष्काराय च पुस्तकेऽस्मिन् अवसराः समाकलिताः। भाषायाः प्रयोगरीतीः अवगन्तुं तद्द्वारा रचनाप्रवर्तनेषु भागभाग्भवितुं च पठनानुभवाः कक्ष्याप्रकोष्ठात् अवाप्तव्याः।

पुस्तकस्यास्य अध्ययनेन संस्कृतस्य विशालं लोकं प्रवेष्टुं प्रेरणा नूनं भविष्यतीति आशासे।

भवदीयः

**डाः जयप्रकाश् आर्. के.**
निदेशकः
राज्यशैक्षिकानुसन्धानप्रशिक्षणपरिषद्,
केरलम्

## TEXT BOOK DEVELOPMENT COMMITTEE
## SANSKRIT STANDARD X
## ORIENTAL SCHOOLS

### Advisor

**V. Madhavan Pillai**, Associate Professor in Sanskrit (Rtd.)

### Chairperson

**Dr. Anand Dilip Raj**, Associate Professor in Sanskrit (Rtd.)

### Experts

**Dr. T. Keralasreemathi**, Senior Research Officer, Sanskrit, SCERT (Rtd.)
**Dr. V. Vasudevan**, Professor in Sanskrit (Rtd.),
Sree Sankaracharya University of Sanskrit.

### Participants

**Lekha.K**, HST, SNVSHS Thrikkaruva, Kollam
**Sajikumar A.V**, HSST Jr., Sanskrit, Govt. HSS Kulathuppuzha, Kollam.
**Dr. Shamla C.M.**, HST, GVHSS Cherpu, Thrissur.
**Simson. R.M.**, HST, GVHSS Thalikulam, Thrissur.
**Sreejith. S. Chandran**, HST, Rev. Dr. CTEM St. Thomas VHSS,
Pannivizha, Adoor, Pathanamthitta.
**Sreekumar V.J.**, HSST (Rtd.), Amritha Sanskrit HSS, Parippally, Kollam.
**Dr. Ullas. N.**, HSST (Rtd.), Govt Skt HSS, Thrippunithura, Eranakulam.
**Abhijith Krishna R.S.**, Artist (Illustrator), Neyyattinkara.
**Sreejith. V.V.**, Artist (Illustrator), Valampath Valappil House, Kannur.

### ACADEMIC CO-ORDINATOR

**Indhu V Pillai**
Research Officer, SCERT Kerala.

राज्यशैक्षिकानुसन्धानप्रशिक्षणपरिषद्, केरलम्
STATE COUNCIL OF EDUCATIONAL RESEARCH AND TRAINING (SCERT) KERALA

# विषयानुक्रमणिका


| एककम् | पाठस्य नाम | व्यवहाररूपम् | पुटसंख्या |
|---|---|---|---|
| 1. भावसान्द्रता । | 1. काव्यशोभा । | काव्यम् । | 7-21 |
| | 2. सुशासनम् । | विवरणम् । | 22-37 |
| 2. संस्कृतिधारा । | 3. मध्यमस्य दीनता । | व्यायोगः। | 38 -56 |
| | 4. काव्यमञ्जरी । | काव्यम् । | 57-75 |
| 3. नैतिकता । | 5. कर्मयोगी श्रीनारायणगुरुः । | उपन्यासः। | 76-86 |
| | 6. जनहिताय । | शास्त्रम् । | 87-94 |



चर्चा


संवादः


अभिमुखम्


आलपनम्


ICT


लेखनम्


अभ्यासपत्रिका


उच्चैर्वाचनम् / अवतारणम्


समर्थनम् / विशदीकरणम्

# ഭാരതത്തിന്റെ ഭരണഘടന

## ആമുഖം

**ഭാരതത്തിലെ ജനങ്ങളായ നാം** ഭാരതത്തെ ഒരു [1]**[പരമാധികാര സ്ഥിതിസമത്വ മതേതര ജനാധിപത്യ റിപ്പബ്ലിക്കായി]** സംവിധാനം ചെയ്യുവാനും അതിലെ പൗരന്മാർക്കെല്ലാം:

സാമൂഹ്യവും സാമ്പത്തികവും രാഷ്ട്രീയവും ആയ **നീതിയും;**

ചിന്തയ്ക്കും ആശയപ്രകടനത്തിനും വിശ്വാസത്തിനും മതനിഷ്ഠയ്ക്കും ആരാധനയ്ക്കും ഉള്ള **സ്വാതന്ത്ര്യവും;**

പദവിയിലും അവസരത്തിലും **സമത്വവും;** സംപ്രാപ്തമാക്കുവാനും;

അവർക്കെല്ലാമിടയിൽ

വ്യക്തിയുടെ അന്തസ്സും [2][രാഷ്ട്രത്തിന്റെ ഐക്യവും അഖണ്ഡതയും] ഉറപ്പുവരുത്തിക്കൊണ്ട് **സാഹോദര്യം** പുലർത്തുവാനും;

സഗൗരവം തീരുമാനിച്ചിരിക്കയാൽ;

**നമ്മുടെ ഭരണഘടനാനിർമ്മാണസഭയിൽ** ഈ 1949 നവംബർ ഇരുപത്താറാം ദിവസം **ഇതിനാൽ ഈ ഭരണഘടനയെ സ്വീകരിക്കുകയും നിയമമാക്കുകയും നമുക്കു തന്നെ പ്രദാനം ചെയ്യുകയും ചെയ്യുന്നു.**

---

1. 1976 - ലെ ഭരണഘടന (നാല്പത്തിരണ്ടാം ഭേദഗതി) ആക്റ്റ് 2-ാം വകുപ്പു പ്രകാരം "പരമാധികാര ജനാധിപത്യ റിപ്പബ്ലിക്" എന്നതിന് പകരം ചേർത്തത് (3.1.1977 മുതൽ പ്രാബല്യം).
2. മേല്പറഞ്ഞ ആക്റ്റ് 2-ാം വകുപ്പു പ്രകാരം "രാഷ്ട്രത്തിന്റെ ഐക്യം" എന്നതിനു പകരം ചേർത്തത് (3.1.1977 മുതൽ പ്രാബല്യം).

## प्रथमम् एककम्

# भावसान्द्रता ।




### आमुखम् ।

विश्वसाहित्यपरम्परायां संस्कृतसाहित्यस्य प्रमुखं हृदयावर्जकं च स्थानमस्ति। गद्यपद्यात्मकस्य संस्कृतसाहित्यस्य परिचयेन हृदयनैर्मल्यं धर्मोत्सुकता व्यवहारबोधः च जायन्ते । काव्यास्वादनं सहृदयानां हृदयाह्लादकत्वरूपं परमं धर्मम् आवहति । 'भावसान्द्रता' इति अस्मिन्नेकके 'काव्यशोभा' 'सुशासनम्' इति पाठद्वयं वर्तते । पाठभागे व्याकरणवृत्तालङ्काराणां समायोजनं एककस्यास्य भाषासम्बद्धं प्राधान्यं दृढयति ।

# प्रथमः पाठः

# काव्यशोभा ।




**पाठप्रवेशः ।**

**यूनां कर्मचेतनाविकासे साहित्यस्य स्थानम्  - संवादः।**

### पाठस्य आमुखम् ।

संस्कृतसाहित्यम् अतिविपुलं विशिष्टं च भवति । संस्कृतकाव्यानि न केवलम् आस्वादनार्थम् अपि तु मनुष्याणां मानसिकबौद्धिकविकासाय च उपकारकाणि भवन्ति । नैषधीयचरितात् मेघदूतात् चम्पूरामायणात् अभिज्ञानशाकुन्तलात् च उद्धृताः पञ्च श्लोकाः अस्मिन् पाठे समाकलिताः। वृत्तालङ्कारपरिचयार्थमपि अत्र अवसरः विहितः।

## १. नैषधीयचरितम् ।

पञ्चमहाकाव्येषु श्रीहर्षेण विरचितं महाकाव्यं भवति नैषधीयचरितम् । प्रायशः कुमारसम्भवम् रघुवंशम् च द्राक्षापाकरूपं नैषधीयचरितम् तु नालिकेरपाकरूपं च । किरातार्जुनीयम् तावदर्थगौरवेण तथा शिशुपालवधम् अलङ्कारप्रयोगैः अर्थगौरवेण पदलालित्येन च मनोरञ्जकं भवति । "नैषधं विद्वदौषधम्" " उदिते नैषधे काव्ये क्व माघः क्व च भारविः?" इत्याद्युक्तयः नैषधीयकाव्यस्य प्रभावं प्रकटयन्ति । एकविंशतिसर्गात्मके अस्मिन् काव्ये निषधाधिपतेः नलस्य वैदर्भ्याः दमयन्त्याः च कथा उपवर्णिता । काव्यस्यास्य प्रथमसर्गादुद्धृतेऽस्मिन् श्लोके कविः नलस्य सर्वविद्यापारङ्गतत्वं वर्णयति ।

**अधीतिबोधाचरणप्रचारणै-**
**र्दशाश्चतस्रः प्रणयन्नुपाधिभिः।**
**चतुर्दशत्वं कृतवान् कुतस्स्वयं**
**न वेद्मि विद्यासु चतुर्दशस्वयम्॥**

(श्लोकसंख्या - १:४)

**पदच्छेदः।**

| | | |
|---|---|---|
| अधीतिबोधाचरणप्रचारणैर्दशाश्चतस्रः | - | अधीतिबोधाचरणप्रचारणैः+ दशाः + चतस्रः । |
| प्रणयन्नुपाधिभिः | - | प्रणयन् + उपाधिभिः । |
| कुतस्स्वयम् | - | कुतः + स्वयम् । |
| चतुर्दशस्वयम् | - | चतुर्दशसु + अयम् । |

**पदार्थः।**

| | |
|---|---|
| अयं | नलः |
| स्वयं | स्वतः एव |
| चतुर्दशसु विद्यासु | चतुर्दशसु विद्यास्थानेषु<br>(अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः।<br>धर्मशास्त्रं पुराणं च विद्या ह्येताश्चतुर्दश ॥) |
| अधीतिबोधाचरणप्रचारणैः | अध्ययनम्, अर्थावगतिः, तदर्थानुष्ठानम् , अध्यापनम् इत्येतैः |
| उपाधिभिः | विशेषैः / आचरणविशेषैः |
| चतस्रः दशाः | चतस्रः अवस्थाः |
| प्रणयन् | कुर्वन् |
| चतुर्दशत्वं | चतुर्दशभावं / चतुर्दशसंख्याकत्वम् |
| कुतः कृतवान् | कस्मात् कृतवान्( सम्पादितवान्) |
| न वेद्मि (पु.सं. २१ पश्यतु) | (इति अहं) न जाने । |

### विग्रहः।

| | | |
|---|---|---|
| चतुर्दशत्वम् | - | चतस्रो दशा यासां ताः चतुर्दशाः तासां भावः। |
| चतुर्दश | - | चतुरधिकाः दश। |
| अधीतिबोधाचरणप्रचारणैः | - | अधीतिः च बोधः च आचरणं च प्रचारणं च अधीतिबोधाचरणप्रचारणानि, तैः। |

### अन्वयः।

अयं स्वयं चतुर्दशसु विद्यासु अधीतिबोधाचरणप्रचारणैः उपाधिभिः चतस्रः दशाः प्रणयन् चतुर्दशत्वं कुतः कृतवान् (इत्यहं) न वेद्मि।

### भावार्थः।

राजा नलः स्वयमेव चतुर्दशसु विद्यासु पुनः चतुर्दशत्वं कृतवान्। चत्वारो वेदाः, षट् वेदाङ्गानि, मीमांसा, न्यायविस्तरः, धर्मशास्त्रं, पुराणं च चतुर्दश विद्याः। नलः विद्यासु अध्ययनं, बोधसम्पादनम्, आचरणं, प्रचारणम् इति चतस्रः दशाः (चतुर्दशत्वं)कृतवान्। चतुर्दशसु पुनः चतुर्दशत्वकरणं किमर्थमिति न जाने। (पद्यस्य भाषानुवादमपि पश्यतु - पु.सं. २०)

### अलङ्कारः - विरोधाभासः। (अर्थालङ्कारः)

अस्मिन् श्लोके विरोधाभासालंकारः भवति। स्वतः सिद्धस्य पुनःकरणं कथं पिष्टपेषणवदिति, चतुर्दशानां चतुरावृत्तौ षट्पञ्चाशत्त्वात् (१४ × ४ = ५६) कथं चतुर्दशत्वमिति च विरोधाभासद्वयम्। चतुरवस्थत्वमिति तत्परिहारश्च। एवमत्र विरोधाभासालङ्कारः।

**आभासत्वे विरोधस्य विरोधाभास इष्यते।**
**विनापि तन्वि ! हारेण वक्षोजौ तव हारिणौ॥**

अयि तन्वि ! तव वक्षोजौ स्तनौ हारेण विनापि हारिणौ हारवन्तौ मनोहारिणौ च। अत्र हारेण विनापि हारिणाविति विरोधः स्फुरति, ततश्च हारिणावित्यस्य मनोहारिणावित्यर्थयोजनया विरोधपरिहाराद् विरोधाभासः। (पुटसंख्या ६९ च पश्यतु।)

### वृत्तम् - वंशस्थम्। (समवृत्तम्)

ज त ज र
U – U | – – U | U–U| –U–
अधीति | बोधाच | रणप्र | चारणै -
र्दशाश्चतस्रः प्रणयन्नुपाधिभिः

अस्मिन् श्लोके प्रतिपादं जगण - तगण- जगण- रगणाः यथाक्रमं भवन्ति इत्यतः वंशस्थं नाम वृत्तम्। यत्र प्रतिपादं जगण – तगण- जगण- रगणाः यथाक्रमं भवन्ति तत्र वंशस्थं नाम वृत्तं भवेत्। अत्र प्रतिपादं द्वादशवर्णाः भवेयुः। तल्लक्षणं तु -

**जतौ तु वंशस्थमुदीरितं जरौ।**

(अपरोदाहरणाय पठनप्रवर्तनं पश्यतु। पु.सं.-१८, तथा समक्षं....।)

# २. मेघदूतम् ।

महाकविना कालिदासेन विरचितं भावप्रधानं खण्डकाव्यं भवति मेघदूतम् । अस्मिन् काव्ये वैश्रवणनियोगेन अलकापुर्यां वसन् कश्चित् यक्षः वर्षभोग्येण प्रवासेन विरहातुरः स्वाधिकारात् प्रमत्तः आषाढमासारम्भे आगतं मेघं प्रियासन्देशं हर्तुम् अभ्यर्थयते । पूर्वमेघम् उत्तरमेघं चेति विभक्तस्य अस्य काव्यस्य पूर्वमेघात् उद्धृतः अयं श्लोकः। यक्षः प्रशंसया मेघं स्वाभिमुखं कुर्वन्नाह -

**जातं वंशे भुवनविदिते पुष्करावर्तकानां**
**जानामि त्वां प्रकृतिपुरुषं कामरूपं मघोनः।**
**तेनार्थित्वं त्वयि विधिवशाद् दूरबन्धुर्गतोऽहं**
**याच्ञा मोघा वरमधिगुणे नाधमे लब्धकामा।।**

(श्लोकसंख्या- ६)

**पदच्छेदः।**

| | | |
|---|---|---|
| तेनार्थित्वम् | - | तेन + अर्थित्वम् |
| दूरबन्धुर्गतोऽहं | - | दूरबन्धुः + गतः + अहं |
| नाधमे | - | न + अधमे |

**पदार्थः।**

| | |
|---|---|
| हे मेघ! | हे मेघ! |
| अहं | यक्षः |
| त्वाम् | भवन्तम्( मेघम्) |
| भुवनविदिते | लोकप्रसिद्धे |
| पुष्करावर्तकानां | पुष्करावर्तकनामकानां प्रलयमेघानां |
| वंशे जातं | कुले उत्पन्नम् |
| कामरूपम् | स्वेच्छारूपम् |
| मघोनः | इन्द्रस्य |
| प्रकृतिपुरुषम् | प्रतिनिधिरूपं पुरुषम् |
| जानामि (पु.सं. २१) | वेद्मि । |
| तेन | तेन हेतुना |
| विधिवशात् | दैववशात् |
| दूरबन्धुः अहं | वियुक्तभार्यः यक्षः |
| त्वयि | त्वत्सकाशे |
| अर्थित्वं | याचकत्वम् |
| गतः | प्राप्तः। |
| अधिगुणे | अधिकगुणयुक्ते |



| | |
|---|---|
| याच्ञा मोघा अपि | याचना निष्फला अपि |
| वरम् | ईषत्प्रियम् । |
| (किन्तु)अधमे ( याच्ञा) | नीचे निर्गुणे कृता याचना |
| लब्धकामा अपि | सफला अपि |
| न (वरम्)। | न अभिलषणीयम् । |

**विग्रहः।**

भुवनविदिते - भुवनेषु विदितः भुवनविदितः, तस्मिन् ।

दूरबन्धुः - बध्नाति स्नेहेन इति बन्धुः, दूरे बन्धुः यस्य सः दूरबन्धुः।

**अन्वयः -** (हे मेघ! अहं) त्वाम् भुवनविदिते पुष्करावर्तकानां वंशे जातं कामरूपं मघोनः प्रकृतिपुरुषं जानामि । तेन विधिवशाद् दूरबन्धुः अहं त्वयि अर्थित्वं गतः । अधिगुणे याच्ञा मोघा अपि वरम् (किन्तु) अधमे (याच्ञा) लब्धकामा अपि न (वरम्) ।

**भावार्थः -** हे मेघ! त्वां लोकप्रसिद्धे पुष्करावर्तकनामकानां प्रलयमेघानां कुले समुत्पन्नम् इच्छाधीनविग्रहम् इन्द्रस्य प्रधानपुरुषं जानामि इत्यतः हेतोः विधिवशाद् वियुक्तभार्यः यक्षः अहं भवतः पुरतः याचकत्वं प्राप्तः । अधिगुणे पुंसि कृता याचना निष्फला अपि वरम् । किन्तु निर्गुणे पुंसि कृता याचना सफला अपि न वरम् । (पद्यस्य भाषानुवादमपि पश्यतु - पु.सं. २०)

**अलङ्कारः - अर्थान्तरन्यासः। (अर्थालङ्कारः)**

अधिगुणे पुंसि कृता याचना निष्फला अपि वरम्। किन्तु निर्गुणे पुंसि कृता याचना सफला अपि न वरम् इति सामान्येन विशेषस्य (यक्षकृतयाचनायाः) समर्थनात् अर्थान्तरन्यासालङ्कारः।

**उक्तिरर्थान्तरन्यासः स्यात् सामान्यविशेषयोः।**

यत्र सामान्यस्य विशेषेण समर्थनं तथा विशेषस्य सामान्येन वा समर्थनं तत्र अर्थान्तरन्यासः।

उदा - **हनुमानब्धिमतरत् दुष्करं किं महात्मनाम् ? !**

अत्र हनुमान् 'अब्धिं -समुद्रं अतरत्' इति विशेषः 'महात्मनां दुष्करं किम् ?!'(दुष्करं किमपि नास्ति) इति सामान्येन समर्थ्यते।

**वृत्तम् - मन्दाक्रान्ता ।**

| म | भ | न | त | त | गु गु |
|---|---|---|---|---|---|
| ––– | –U U | UUU | ––U | ––U | –– |
| जातं वं | शे भुव | नविदि | ते पुष्क | रावर्त | कानां |

जानामि त्वां प्रकृतिपुरुषं कामरूपं मघोनः।

अस्मिन् पद्ये प्रतिपादं मगण - भगण - नगण - तगण- तगणाः गुरुद्वयं च यथाक्रमं भवन्ति इत्यतः मन्दाक्रान्ता नाम वृत्तं भवति । अत्र चतुर्भिः (चतुर्थे वर्णे), षड्भिः (दशमे वर्णे), सप्तभिश्च वर्णैः (सप्तदशे वर्णे) यतिः। प्रतिपादं सप्तदशवर्णाः भवन्ति। (जलधयः – चत्वारः, षट्, अगाः(नगाः) सप्त।)। मन्दाक्रान्तायाः लक्षणं तु -

**मन्दाक्रान्ता जलधिषडगैर्म्भौ नतौ ताद् गुरू चेत्।**

(अपरोदाहरणाय पठनप्रवर्तनं पश्यतु। पु.सं. १९ - धूमज्योतिः......।)

## ३. चम्पूरामायणम् ।

भोजराजेन विरचितं चम्पूकाव्यं भवति रामायणचम्पूः । तत्र पञ्च काण्डानि भोजराजेन विरचितानि सन्ति, शिष्टं युद्धकाण्डं लक्ष्मणसूरिणा च विरचितम् । चम्पूरामायणस्य अयोध्याकाण्डात् उद्धृतोऽयं श्लोकः । रामाभिषेकार्थं दशरथस्य आलोचनावाक्यमाकर्ण्य सुमन्त्रादयोऽमात्याः मनोऽभिलाषं प्रख्यापितवन्तं दशरथम् एवं सादरमवोचन् ।

**देवे स्थितेऽपि तनयं तव रामभद्रं**
**लोकः स्वयं भजतु नाम किमत्र चित्रम् ।**
**चन्द्रं विना तदुपलम्भनहेतुभूतं**
**क्षीरोदमाश्रयति किं तृषितश्चकोरः॥**

(अयोध्याकाण्डः, श्लोकसंख्या -६)

**पदच्छेदः।**

| | |
|---|---|
| स्थितेऽपि - | स्थिते + अपि |
| तृषितश्चकोरः - | तृषितः+ चकोरः |

**पदार्थः।**

| | |
|---|---|
| देवे स्थितेऽपि | महाराजे जीवति सत्यपि |
| तव तनयं | भवतः पुत्रं |
| रामभद्रं | श्रीरामचन्द्रं |
| लोकः | जनः |
| स्वयं भजतु नाम | आत्मना आश्रयतु |
| किमत्र चित्रम् ? | इत्यत्र किमाश्चर्यम् ? |
| तृषितः | पिपासितः |



| | |
|---|---|
| चकोर: | पक्षिविशेषः |
| चन्द्रं विना | इन्दुं विना |
| तदुपलम्भनहेतुभूतम् | तस्य चन्द्रस्य उत्पत्तौ कारणभूतम् |
| क्षीरोदं | क्षीरसागरं |
| किम् | कथं |
| आश्रयति | सेवते (न सेवते इत्यर्थः)। |

**विग्रहः।**

तदुपलम्भनहेतुभूतं - तस्य उपलम्भनं तदुपलम्भनम्, तस्य हेतुभूतः, तम्।

**अन्वयः।**

देवे स्थितेऽपि तव तनयं रामभद्रं लोकः स्वयं भजतु नाम, किमत्र चित्रम्। तृषितः चकोर: चन्द्रं विना तदुपलम्भनहेतुभूतं क्षीरोदम् आश्रयति किम्?

**भावार्थः।**

प्रजापालनतत्परः भवान् यथायोग्यं शास्ति तथापि प्रजाः स्वयं बालकमपि रामचन्द्रम् आश्रयन्ति। अत्र किमप्याश्चर्यं नास्ति। यतः पिपासितः चकोरः चन्द्रं विना चन्द्रस्य उत्पत्तौ कारणभूतं क्षीरसागरं कदापि नाश्रयति।

अत्र दशरथक्षीरसागरयोः तथा रामचन्द्रचन्द्रयोः च बिम्बप्रतिबिम्बभावेन वर्णनाद् दृष्टान्तालङ्कृतिः।

**अलङ्कारः - दृष्टान्तालङ्कारः। (अर्थालङ्कारः)**

**चेद्बिम्बप्रतिबिम्बत्वं दृष्टान्तस्तदलङ्कृतिः।**

वर्ण्यावर्ण्ययोः बिम्बप्रतिबिम्बत्वं चेत् तत् दृष्टान्तालङ्कृतिः इत्यर्थः।

उदा - **त्वमेव कीर्तिमान् राजन्! विधुरेव हि कान्तिमान्।**

हे राजन्! त्वमेव कीर्तिमान् हि विधुरेव कान्तिमान् इत्यन्वयः। अत्र राजा वर्ण्यः, विधुः अवर्ण्यः। वर्ण्यावर्ण्ययोः कीर्तिमत्त्वकान्तिमत्त्वरूपौ धर्मौ बिम्बप्रतिबिम्बभावेन निर्दिष्टौ इति लक्षणसमन्वयः। राज्ञः कीर्तेः विधोः कान्त्याः च धावल्यरूपाह्लादकत्वं सामान्यतया अस्तीति हेतोः बिम्बप्रतिबिम्बभावः कल्पितः।

प्रकृतश्लोके दशरथाज्जातः रामः वर्ण्यः। क्षीरसमुद्रजातः चन्द्रः अवर्ण्यः। तयोः जनप्रियत्व चकोरसेव्यत्वरूपौ धर्मौ बिम्बप्रतिबिम्बरूपेण निर्दिष्टौ। जनकापेक्षया अधिकप्रियत्वं रामस्य सामान्यतया अस्तीति तथा कल्पना।

**वृत्तम् – वसन्ततिलका।**

लक्षणम्- **उक्ता वसन्ततिलका तभजा जगौ गः।** (पठितपूर्वम् Std IX TB पु.सं.२६&२७)

**क्रियापदम्।**

आश्रयति - आङ् + श्रिञ् सेवायां उ.प. लट्. प्र. पु. ए. व.।

**कोशः।**

तनयः - आत्मजस्तनयः सूनुः सुतः पुत्रः स्त्रियां त्वमी।

## ४. अभिज्ञानशाकुन्तलम् ।

महाकविकालिदासविरचितं भुवनप्रसिद्धं नाटकं भवति अभिज्ञानशाकुन्तलम् । 'उपमा कालिदासस्य', 'दीपशिखा कालिदासः', 'कविकुलगुरुः कालिदासः' इत्येवं कालिदासमधिकृत्य महासूरिणां वचनानि बहूनि सन्ति । अभिज्ञानशाकुन्तलं नाटकं कवेरस्य त्रिषु नाटकेषु प्रशस्तं विराजते । सप्ताङ्कयुतेऽस्मिन् नाटके दुष्यन्तशकुन्तलयोः प्रेम सूक्ष्मभावेन कविः वर्णयति ।

**काव्येषु नाटकं रम्यं तत्र शाकुन्तलं मतम् ।**
**शाकुन्तले चतुर्थोऽङ्कः तत्र श्लोकचतुष्टयम् ॥**

इति प्रथा प्रसिद्धा खलु । शकुन्तलायाः पतिगृहगमनसमये कण्वमहर्षेः विचारणां सूक्ष्मभावेन कविः एवं प्रकटयति ।

**यास्यत्यद्य शकुन्तलेति हृदयं संस्पृष्टमुत्कण्ठया**
**कण्ठः स्तम्भितबाष्पवृत्तिकलुषश्चिन्ताजडं दर्शनम् ।**
**वैक्लब्यं मम तावदीदृशमहो स्नेहादरण्यौकसः**
**पीड्यन्ते गृहिणः कथं नु तनयाविश्लेषदुःखैर्नवैः ॥**

(श्लोकसंख्या - ४.६)

**पदच्छेदः।**

यास्यत्यद्य - यास्यति + अद्य
शकुन्तलेति - शकुन्तला + इति
स्नेहादरण्यौकसः - स्नेहात् +अरण्यौकसः
तनयाविश्लेषदुःखैर्नवैः - तनयाविश्लेषदुःखैः + नवैः



**पदार्थ :**

अद्य अस्मिन्नहनि
शकुन्तला मम पुत्री शकुन्तला
यास्यति (भर्तृगृहं) गमिष्यति
इति इति हेतोः
हृदयं मम मनः
उत्कण्ठया चिन्तया
संस्पृष्टं अभिव्याप्तम् ;
कण्ठः गलः
स्तम्भितबाष्पवृत्तिकलुषः स्तम्भिता अवरुद्धा - या बाष्पवृत्तिः अश्रुप्रसरः तया कलुषः विकृतः
दर्शनं लोचनम्
चिन्ताजडं चिन्तया (शकुन्तलावियोगभावनया) जडं - विषयग्रहणाक्षमम्

| | |
|---|---|
| अरण्यौकसः | वनवासिनः |
| मम तावत् | मेऽपि (कण्वस्यापि) |
| स्नेहात् | वात्सल्यात् |
| ईदृशम् | एतादृशम् |
| वैक्लब्यं | विह्वलत्वम् (हृदयपारवश्यं दुःखं जातमिति शेषः) |
| गृहिणः | गृहस्थाः |
| नवैः | नूतनैः |
| तनयाविश्लेषदुःखैः | कन्यायाः वियोगकष्टैः |
| कथं नु पीड्यन्ते ? | कथं न व्याकुलीक्रियन्ते, सुतरां पीड्यन्ते इत्यर्थः । |
| अहो ! | कष्टम् (अहो इति व्याक्षेपकशब्दः।) |

**विग्रहः।**

| | | |
|---|---|---|
| दर्शनम् | - | दृश्यते अनेन इति । |
| चिन्ताजडं | - | चिन्तया जडम् । |
| अरण्यौकसः | - | अरण्यम् ओकः यस्य सःअरण्यौकाः, तस्य । |
| तनयाविश्लेषदुःखैः | - | तनयायाः विश्लेषः तनयाविश्लेषः, तेन दुःखानि, तैः । |

**अन्वयः-** अद्य शकुन्तला यास्यति इति हृदयम् उत्कण्ठया संस्पृष्टम्, कण्ठः स्तम्भितबाष्पवृत्तिकलुषः, दर्शनं चिन्ताजडम्(च भवति) । अरण्यौकसः मम तावत् स्नेहात् ईदृशम् वैक्लब्यं (भवति चेत्) अहो! नवैः तनयाविश्लेषदुःखैः गृहिणः कथं नु पीड्यन्ते ?

**भावार्थः-** अद्य शकुन्तला पतिगृहं गमिष्यति इति हेतुना मम मनः दुःखेन समाक्रान्तमस्ति । स्तम्भिताभिः अश्रुभिः कण्ठः कलुषः भवति । वियोगभावनया दर्शनं निश्चेष्टं च । वनवासिनः ममापि (कण्वस्यापि) प्रेम्णः एतादृशमेतद् दुःखाधिक्यमस्ति । एवं चेत् अहो! प्रथमोत्पन्नैः पुत्रीवियोगदुःखैः गृहस्थाः कथं न पीड्यन्ते ? लौकिकजीवनात् विरक्तस्य जनस्य एतादृशं दुःखं भवति चेत् लौकिकानां गृहस्थानां दुःखस्य मानम् अपरिमेयम् इत्याशयः। (पद्यस्य भाषानुवादमपि पश्यतु - पु.सं. २०)

**वृत्तम् - शार्दूलविक्रीडितम् । (समवृत्तम्)**

लक्षणम्- सूर्याश्वैर्मसजास्ततः सगुरवः शार्दूलविक्रीडितम् । (आगामिनिपाठे विशदीकृतं भवेत्।, पु.सं.६२)

**अलङ्कारः – काव्यलिङ्गम् । (अर्थालङ्कारः)**

अरण्यौकसः मम स्नेहात् ईदृशं वैक्लब्यम् अस्ति चेत् गृहिणः नवैः तनयाविश्लेषदुःखैः कथं न पीड्यन्ते इति तनयाविश्लेषदुःखस्य समर्थनात् अत्र काव्यलिङ्गं नाम अलङ्कारः। तस्य लक्षणोदाहरणे यथा -

समर्थनीयस्यार्थस्य काव्यलिङ्गं समर्थनम् ।
जितोऽसि मन्द! कन्दर्प! मच्चित्तेऽस्ति त्रिलोचनः।।

हे मूढ! कामदेव! त्वं मया जितः असि । यतः मम मनसि त्रिलोचनः वर्तते । अत्र कामदेवोपरि विजयरूपस्य समर्थनीयस्य विषयस्य मे मनसि त्रिलोचनः अस्ति इति कामदेवहरस्य शिवस्य सान्निध्यकल्पनया समर्थनात् काव्यलिङ्गालङ्कारः। (पश्यतु पु.सं. ४५)

## ५. अभिज्ञानशाकुन्तलम् ।

शाकुन्तलस्य प्रथमेऽङ्के प्रस्तावनायां नटीं प्रति सूत्रधारः एवं वदति -

**आपरितोषाद् विदुषां**
**न साधु मन्ये प्रयोगविज्ञानम् ।**
**बलवदपि शिक्षितानाम्**
**आत्मन्यप्रत्ययं चेतः ॥** (श्लोकसंख्या १:२)

**पदच्छेदः।**

आत्मन्यप्रत्ययम् - आत्मनि + अप्रत्ययम् ।

**पदार्थः।**

| | |
|---|---|
| विदुषां | पण्डितानां |
| आपरितोषात् | सन्तोषजननपर्यन्तं , |
| प्रयोगविज्ञानं | प्रयोगसामर्थ्यं |
| साधु(इति) | शोभनम् इति(सफलमित्यर्थः) |
| न मन्ये। | न गणयामि। |
| बलवत् शिक्षितानाम् अपि | सम्यग् अभ्यस्तविद्यानामपि |
| चेतः | चित्तम् |
| आत्मनि | स्वविषये |
| अप्रत्ययं | अविश्वस्तं भवति । |

**विग्रहः।**

प्रयोगविज्ञानम् - प्रयोगस्य विज्ञानम् ।

अप्रत्ययम् - न विद्यते प्रत्ययः यस्य, तत् अप्रत्ययम् ।

**अन्वयः-** विदुषाम् आपरितोषात् प्रयोगविज्ञानं साधु न मन्ये । बलवद् शिक्षितानाम् अपि चेतः आत्मनि अप्रत्ययम् (भवति) ।

**भावार्थः -** यावत् त्याज्यग्राह्यविवेचनबुद्धयः विद्वज्जनाः न परितुष्यन्ति तावत् मम प्रयोगपाटवं सम्यक् इति न मन्ये । सुशिक्षितानां विद्वज्जनानामपि स्वसामर्थ्ये संपूर्णविश्वासः न भवेदेव । (पद्यस्य भाषानुवादमपि पश्यतु। पृ.सं. २०)

**वृत्तम्- आर्या(मात्रावृत्तम् )**

2 1 1 2 2  1 1 2 (12)
आपरितोषाद् विदुषां
1 2 1 2 2 1 2 1 2 2 2 (18)
न साधु मन्ये प्रयोगविज्ञानम् ।
1 1 1 1 1 2 1 2 2 (12)
बलवदपि शिक्षितानाम्
2 2 2 2 1 2 2 2 (15)
आत्मन्यप्रत्ययं चेतः ॥

अस्मिन् श्लोके प्रथमतृतीयपादयोः द्वादश मात्राः, द्वितीये पादे अष्टादश मात्राः, चतुर्थे पादे पञ्चदश मात्राः च भवन्ति इत्यतः आर्यानाम वृत्तं स्यात् । लघुः (U) एकमात्रया, गुरुः(-) द्विमात्रया च गण्यते । आर्यायाः लक्षणं तु-

**यस्याः प्रथमे पादे**
**द्वादश मात्राः तथा तृतीयेऽपि ।**
**अष्टादश द्वितीये**
**चतुर्थके पञ्चदश सार्या ॥**

(अपरोदाहरणाय पठनप्रवर्तनं पश्यतु। पु.सं.१९, करपल्लवः स तस्याः......।)

## पठनप्रवर्तनानि ।

**व्याख्यानं पठित्वा पाठभागस्थश्लोकानाम् अन्वयं चर्चित्वा लिखतु ।**

श्रद्धेयाः अंशाः-

- चर्चा ।
- श्लोकस्य आशयग्रहणम् ।
- अन्वयलेखनम् ।

**सङ्घे चर्चित्वा पाठभागस्थश्लोकानाम् आशयं स्वांशीकृत्य लिखतु ।**

श्रद्धेयौ अंशौ -

- व्याख्यानं पठित्वा चर्चा ।
- आशयलेखनम् ।

**अधोदत्तान् श्लोकान् पठित्वा कःअलङ्कारः इति लक्ष्यलक्षणसमन्वयपूर्वकं लिखत ।**

1. अधीतिबोधाचरणप्रचारणैः ............ चतुर्दशस्वयम् ।
2. जातं वंशे ............. लब्धकामा ।
3. देवे स्थितेऽपि .......... तृषितश्चकोरः।
4. यास्यत्यद्य शकुन्तलेति ............तनयाविश्लेषदुःखैर्नवैः ।

श्रद्धेयाः अंशाः-

- व्याख्यानस्य पठनम् ।
- चर्चा टिप्पणीलेखनं च ।
- लक्षणसमन्वयपूर्वकं समर्थनम् ।

**अधोदत्तानां श्लोकानां गणनिर्णयं कृत्वा लक्ष्यलक्षणसमन्वयपूर्वकं वृत्तं समर्थयतु ।**

1. **तथा समक्षं दहता मनोभवं**
**पिनाकिना भग्नमनोरथा सती ।**
**निनिन्द रूपं हृदयेन पार्वती**
**प्रियेषु सैभाग्यफला हि चारुता ।।** (कुमारसम्भवम्, कालिदासः, श्लोकसंख्या ५: १)

2. **धूमज्योतिस्सलिलमरुतां सन्निपातः क्व मेघः**
**सन्देशार्थाः क्व पटुकरणैः प्राणिभिः प्रापणीयाः ।**
**इत्यौत्सुक्यादपरिगणयन् गुह्यकस्तं ययाचे**
**कामार्ता हि प्रकृतिकृपणाश्चेतनाचेतनेषु ॥**

(मेघदूतम्, कालिदासः, श्लोकसंख्या १:५)

3. **करपल्लवः स तस्याः**
**सहसैव जडो जडात्परिभ्रष्टः ।**
**परिकम्पिनः प्रकम्पी**
**करान्मम स्विद्यतः स्विद्यन् ॥**

(उत्तररामचरितम्, भवभूतिः, श्लोकसंख्या ३ : ४१)

श्रद्धेयाः अंशाः-

- व्याख्यानस्य पठनम् ।
- सङ्घे चर्चा ।
- गणनिर्णयः।
- समर्थनम् ।

**ताललयसमन्वितं श्लोकं कक्ष्यायाम् आलपतु । आलपितस्य श्लोकस्य शब्दमुद्रणं कृत्वा कक्ष्यायाम् श्रावयतु ।**

श्रद्धेयाः अंशाः-

- समानवृत्तबद्धश्लोकानां श्रवणम् ।
- आलपनाभ्यासः।
- आलपनं शब्दमुद्रणं च ।
- कक्ष्यायां पुनः श्रावयितुम् अवसरदानम् ।

**अध्यापकपुस्तके दत्तान् परामृष्टग्रन्थान् पठित्वा अधोनिर्दिष्टानां कवीनां रचनाः योजयित्वा एकां पट्टिकां रचयत । कवीनधिकृत्य टिप्पणीं लिखित्वा ऐ.सी.टी. द्वारा कक्ष्यायाम् अवतारयतु च ।**

क. कालिदासः।
ख. श्रीहर्षः।
ग. भोजराजः।

श्रद्धेयाः अंशाः-

- परामृष्टग्रन्थान् पठित्वा पट्टिकारचना कवीनधिकृत्य टिप्पणीलेखनं च ।
- कक्ष्यायाम् अवतारणं चर्चा च ।
- परिष्कृत्य लेखनम् ।
- ऐ.सी.टी. द्वारा अवतारणम् ।

# अनुबन्धः।

## १. पाठभागस्थश्लोकानां कैरल्या अनुवादः।

1. നൂനം പഠിത്ത, മറിവാ, ചരണോ, പദേശ-
മീനാലു രീതികളിയന്നിവനേതു മട്ടിൽ
മാനിച്ചു ചേർത്തിതു ചതുർദ്ദശവിദ്യകൾക്കും
താനേ ചതുർദശത? - ഞാനറിയുന്നതില്ല.

(ഭാഷാനൈഷധം – എസ്. പുരുഷോത്തമൻ നമ്പൂതിരി)

ആശയം - രാജാവായ നളൻ പതിനാല് വിദ്യകളിൽ അധീതി, ബോധം, ആചരണം, പ്രചാരണം എന്നീ നാല് അവസ്ഥകളെ പ്രണയിച്ചിട്ട് (14x4 = 56) പതിനാല് ഭാവങ്ങൾ അല്ലെങ്കിൽ ചതുർദ്ദശസംഖ്യാകത്വം എന്തുകൊണ്ടാണ് ചെയ്തത് എന്ന് ഞാൻ അറിയുന്നില്ല. (എനിക്ക് അറിഞ്ഞുകൂടാ)

2. പേരാളും പുഷ്കരാവർത്തകകുലമതിലാ-
ണുത്ഭവം, കാമരൂപൻ
സ്വാരാജാമാത്യനാം നീ; ദയിത വിധിവശാൽ
ദൂരെയായ് ദൂനനാം ഞാൻ
ഓരാതല്ലിന്നപേക്ഷിപ്പതു; ഫലമുളവാ -
കായ്കിലും നല്ലതാര്യ -
ന്മാരാണർത്ഥിച്ചുകൊൾവാൻ, ഫലമണയുകിലും
നീചരോടാകിൽ നിന്ദ്യം.

(മേഘദൂതം, ശ്ലോ.സം.1-5, വിവർത്തനം മഹാകവി ജി. ശങ്കരക്കുറുപ്പ്)

3. പോകുന്നുണ്ടിതുനാൾ ശകുന്തള പിരി-
ഞ്ഞെന്നോർത്തു ഹൃത്തുത്സുകം
തൂകാഞ്ഞശ്രുഗളോദരം കലുഷിതം
ഭാവം ജഡം ചിന്തയാൽ
കാട്ടിൽപ്പാർക്കുമെനിക്കുമിത്ര കഠിനം
സ്നേഹോദിതം കുണ്ഠിതം
നാട്ടിൽപ്പെട്ട ഗൃഹസ്ഥനെത്രയുളവാം
പുത്രീവിയോഗവ്യഥ.

(അഭിജ്ഞാനശാകുന്തളം, അങ്കം-4, ശ്ലോ.സം. 6– പരിഭാഷ, ഏ.ആർ. രാജരാജവർമ്മ)

4. വിദ്യശരിയെന്നുറയ്ക്കാൻ
വിദ്വത്പ്രീതിക്കു പാത്രമായ് വരേണം,
നന്നായ് പഠിച്ചവന്നും
തന്നിൽ വരുന്നില്ല നല്ല വിശ്വാസം.

(അഭിജ്ഞാനശാകുന്തളം, അങ്കം-1,ശ്ലോ.സം.2 – പരിഭാഷ, ഏ.ആർ. രാജരാജവർമ്മ)

" रमणीयार्थप्रतिपादकः शब्दः काव्यम्। "
(रसगङ्गाधरः)

## २. ज्ञा धातोः कर्तरि लट् परस्मैपदरूपाणि।

| | ए.व. | द्वि.व. | ब.व. |
|---|---|---|---|
| प्र. पु. | जानाति | जानीतः | जानन्ति |
| म. पु. | जानासि | जानीथः | जानीथ |
| उ. पु. | जानामि | जानीवः | जानीमः। |

## ३. विद् धातोः कर्तरि लट् परस्मैपदरूपाणि।

| | ए.व. | द्वि.व. | ब.व. |
|---|---|---|---|
| प्र. पु. | वेत्ति, वेद | वित्तः, विदतुः | विदन्ति, विदुः |
| म. पु. | वेत्सि, वेत्थ | वित्थः, विदथुः | वित्थ, विद |
| उ. पु. | वेद्मि, वेद | विद्वः, विद्व | विद्मः, विद्म। |

## किमधिगतम्।

| पठनप्रवर्त्तनानि। | स्वांशीकृतम्। | भागिकतया स्वांशीकृतम्। | प्रगतये प्रयत्नः करणीयः। |
|---|---|---|---|
| अन्वयलेखनं कृतम्। | | | |
| आशयलेखनं कृतम्। | | | |
| अलङ्कारस्य लक्षणसमन्वयपूर्वकं समर्थनं कृतम्। | | | |
| गणनिर्णयपूर्वकं वृत्तं समर्थितम्। | | | |
|ताललयसमन्वितम् आलपनं शब्दमुद्रणं च कृतम्। | | | |
| पट्टिकारचना, टिप्पणीलेखनं, ऐ.सी.टी. द्वारा प्रदर्शनं च कृतम्। | | | |

“ अपादः पदसङ्घातो गद्यम्। ”
“ गद्यं कवीनां निकषं वदन्ति। ”
गद्यविभागे राज्यशासनप्रधानं लघुविवरणं पठामः।



## द्वितीयः पाठः

# सुशासनम् ।

**पाठप्रवेशः।**

मावलिशासनकाले देशे
मानवाः सर्वे समाना एव ।
आवसन् सामोदमेव सर्वे
आपदो नासन् कदापि केषाम् ॥
चौर्यमपि नासीद् वञ्चनापि
तिलमात्रं नासीत् तदानृतं च ।
नासन् च व्याजानि मापकानि
अन्यान्यलीकानि तत्र नासन् ॥
दुःखानि नासन् च रोगाः नासन्
बालमरणानि नैव श्रोतुं ।
दुष्टान् तदा द्रष्टुं नैव साध्यं
सज्जनाःकेवला ह्यासन् भूमौ ॥

- गीतमिदं श्रुतपूर्वं वा ?
- अस्य कैरलीगीतस्य कर्ता कः?
- अस्य संस्कृतानुवादकः कः?
- अस्य गीतस्य सन्देशः कः?

**मावलिसदृशस्य एकस्य राज्ञः शासनमधिकृत्य पठामः।**

## आमुखम् ।

गद्यं पद्यमिति साहित्यरूपस्य प्रधानतया द्वैविध्यमस्ति । इतिहासपुराणमहाकाव्यानि प्रायशः छन्दोबद्धानि पद्यमयानि भवन्ति । तेषां बाहुल्यमपेक्ष्य गद्यकृतीनां वैरल्यं दृश्यते च । त्रयः गद्यकाराः चत्वारि गद्यकाव्यानि च प्रसिद्धानि सन्ति संस्कृतवाङ्मये । सुबन्धोः वासवदत्ता, दण्डिनः दशकुमारचरितम्, बाणभट्टस्य हर्षचरितम् कादम्बरी चेति द्वे गद्यकाव्ये च प्रसिद्धानि विराजन्ते ।

गद्यकाव्यस्य तु इतिवृत्तस्वभावेन कथा आख्यायिका चेति द्वैविध्यमस्ति । कथा कल्पितकथाश्रिता, आख्यायिका चरित्रवस्तुताश्रिता च भवति । सुबन्धोः वासवदत्ता संस्कृतसाहित्ये अतिप्राचीना स्वतन्त्रा च गद्यकृतिः भवति ।

अल्पमात्रं च कथाबीजं स्वधिषणावैशिष्ट्येन उत्तमगद्यकाव्यरूपे सन्निवेश्य सुबन्धुः महाकविपदमवाप । वासवदत्तायां वासवदत्ताकन्दर्पकेत्वोः प्रणयः विरहः पुनस्समागमः तथा उत्तमनृपशासनं प्रकृतिलावण्यं च मुख्यतया वर्ण्यते । ग्रन्थस्यास्य प्रारम्भभागाद् उद्धृतः विन्ध्याचलप्रदेशस्य राज्ञः चिन्तामणेः उत्तमनृपशासनमधिकृत्य कश्चन भागः पाठभागत्वेन स्वीक्रियते । पश्यामः -

**"यत्र च शासति धरणिमण्डलं छलनिग्रहप्रयोगो वादेषु, नास्तिकता चार्वाकेषु, कण्टकयोगो योगेषु, परीवादो वीणासु, खलसंयोगः शालिषु, द्विजिह्वसङ्गृहीतिराहितुण्डिकेषु, करच्छेदः क्लृप्तकरग्रहणेषु, नेत्रोत्पाटनं मुनीनां, द्विजराजविरुद्धता पङ्कजानां, सार्वभौमयोगो दिग्गजस्य, अग्नितुलाशुद्धिः सुवर्णानां, सूचीभेदो मणीनां, शूलभङ्गो युवतिप्रसवे, दुःशासनदर्शनं भारते, करपत्रदारणं जलजानाम् ।"**

**यत्रेति**

- यस्मिन् चिन्तामणौ राजनि, धरणिमण्डलं – भूवलयं, शासति (सति) - शासनं कुर्वति सति ।

**छलनिग्रहप्रयोगो वादेषु -**

- छलनिग्रहप्रयोगः - वाक्छलस्य पराभवस्य च प्रयोगः वादप्रक्रियायाम् एव आसीत् ।
- छलनिग्रहप्रयोगः - छलस्य - कापट्यस्य, निग्रहस्य - बन्धनस्य च प्रयोगः जनेषु नासीत्, प्रजानां धार्मिकत्वात् ।

## नास्तिकता चार्वाकेषु -

- नास्तिकता - नास्तिकवादपक्षः चार्वाकमतानुयायिषु एव आसीत् ।
- नास्तिकता - न अस्ति किञ्चित् इत्यस्य भावः नास्तिकता । सा जनेषु नासीत् । सर्वेषां समृद्धत्वात् ।

## कण्टकयोगो योगेषु -

- कण्टकयोगः - रोमाञ्चयोगः योगे ध्यानं कुर्वतां ब्रह्मसाक्षात्कारेण आसीत् ।
- कण्टकयोगः - सूच्यग्रप्रयोगः अपराधिषु जनेषु दण्डरूपेण नासीत्। जनैः अपराधस्यैव अकरणात् ।

## परीवादो वीणासु -

- परीवादः - वीणातन्त्री वीणासु एव आसीत् ।
- परीवादः - परस्परनिन्दा जनेषु नासीत् ।

## खलसंयोगः शालिषु -

- खलसंयोगः - उलूखलसंबन्धः शालिषु - धान्येषु एव आसीत् ।
- खलसंयोगः - दुष्टसम्बन्धः जनेषु नासीत् ।

## द्विजिह्वसङ्गृहीतिः आहितुण्डिकेषु -

- द्विजिह्वसङ्गृहीतिः - सर्पग्रहणं सर्पोपजीविषु आसीत् ।
- द्विजिह्वसङ्गृहीतिः - द्विजिह्वानां मिथ्याभाषिणाम् अङ्गीकारः जनेषु नासीत् ।



(**द्विजिह्वसङ्गृहीतिराहितुण्डिकेषु** – इत्यत्र **श्लेषालङ्कारः** - अस्मिन् उदाहरणे द्विजिह्वाः इत्यस्य सर्पाः, मिथ्याभाषिणः इति अर्थद्वयम् । - सर्पपक्षे द्विजिह्वानां सर्पाणां सङ्गृहीतिः संग्रहणम् आहितुण्डिकेषु सर्पोपजीविषु आसीत् । मिथ्याभाषणशीलानां पक्षे, मिथ्याभाषण-शीलानां संग्रहो नासीत् । मिथ्याभाषिणो जनान् न कोऽपि समीप उपवेशयतीत्यर्थः। अयं प्रकृतश्लेषःसर्प-मिथ्याभाषणशीलयोः प्रकृतत्वात् ।)

**करच्छेदः क्लृप्तकरग्रहणेषु -**

- करच्छेदः - राजदेयभागस्य विभागः, परिक्लृप्तस्य करस्य ग्रहणेषु आसीत् ।
- करच्छेदः - हस्तकर्तनं, दण्डरूपेण प्रजासु नासीत्। दण्डनीयस्याभावात् ।

**नेत्रोत्पाटनं मुनीनाम् -**

- नेत्रोत्पाटनम् - वृक्षवल्कलानाम् उन्मूलनं, मुनीनां वस्त्रस्य कृते आसीत् ।
- नेत्रोत्पाटनम् - नेत्रयोः चक्षुषोः उत्पाटनं, हिंसारूपेण प्रजासु नासीत् ।

**द्विजराजविरुद्धता पङ्कजानाम् -**

- द्विजराजः - चन्द्रः। तेन विरुद्धता - प्रातिकूल्यं पङ्कजानाम् आसीत् ।
- द्विजराजाः - ब्राह्मणश्रेष्ठाः। तैः विरुद्धाचरणं जनेषु नासीत् ।

(**द्विजराजविरुद्धता पङ्कजानाम्** - इत्यत्र **श्लेषालङ्कारः**। अस्मिन् उदाहरणे - चन्द्रपक्षे,द्विजराजः - चन्द्रस्तद्विरुद्धता प्रातिकूल्यं पङ्कजानां कमलानाम् आसीत् । ब्राह्मणपक्षे - (प्रजानाम्) द्विजराजानां - श्रेष्ठब्राह्मणानां प्रातिकूल्यं न आसीत्, तत्प्रतिपादितयज्ञाद्यनुष्ठान-सरणिमनुवर्तन्ते स्म । अयं प्रकृतश्लेषःचन्द्र-ब्राह्मणरूपत्वेन प्रकृतत्वात् ।)

**सार्वभौमयोगो दिग्गजस्य -** (पु. सं. ३५)

- सार्वभौमः - अष्टदिग्गजेषु एकः। तेन सम्बन्धः दिग्गजानाम् आसीत् ।
- सार्वभौमः - चक्रवर्ती । तादृशसार्वभौमयोगः - सार्वभौमप्राप्तिः राजानं विना इतरेषु नासीत्। अस्यैव चक्रवर्तित्वात् ।

**अग्नितुलाशुद्धिः सुवर्णानाम् -**

- अग्नितुलाशुद्धिः - अग्निना तुलया च शुद्धिः वर्णमानज्ञानं सुवर्णानाम् आसीत् ।
- अग्नितुलाशुद्धिः - अग्निशुद्धिः तुलाशुद्धिः च दण्डनरीतिद्वयं प्रजासु नासीत् । दण्डनीयस्य अभावात् ।

**सूचीभेदः मणीनाम् -**

- सूचीभेदः - सूचीवेधः - सूच्या वेधनं रन्ध्रविधानं मणीनां क्रियते मालाकरणार्थम् ।
- सूचीभेदः - सूचीवेधः - सूचीवेधनम् इति दण्डनं नासीत् प्रजानाम् । दण्डनीयस्य अभावात् ।

### शूलभङ्गो युवतिप्रसवे -

- शूलभङ्गः - शूलेन प्रसवामयेन भङ्गः - पीडनं युवतिप्रसवे एव आसीत्।
- शूलभङ्गः - शूलेन आयुधेन पीडनं दण्डरूपेण जनेषु नासीत्। दण्डनीयस्य अभावात्।

### दुःशासनदर्शनं भारते -

- दुःशासनदर्शनम् - दुःशासनस्य - दुर्योधनानुजस्य दर्शनं महाभारते एव।
- दुःशासनदर्शनम् - दुष्टशासनस्य दर्शनं जनेषु नासीत्। यतः सर्वे साधवः।

### करपत्रदारणं जलजानां

- करपत्रदारणम् - करैः - सूर्यकिरणैः पत्राणां किसलयानां दारणं - विकसनं पङ्कजानाम्।
  अथवा करपत्राणां पद्मदलानां दारणं - विकसनम्।
- करपत्रदारणम् - करपत्रेण आयुधेन भेदनं दण्डनरूपेण प्रजासु नासीत्। दण्डनीयस्य अभावात्।

(विस्तृतव्याख्यां भाषानुवादं च पश्यतु। पुट सं. - ३३ - ३५)

**अत्र समाकलिते पाठभागे पञ्चदशवाक्यघटकेष्वपि वर्ण्यावर्ण्योभयाश्रितस्य श्लेषालङ्कारस्य मनोरञ्जकं निबन्धनं दरीदृश्यते।**

### पदच्छेदः।

| | | |
|---|---|---|
| परीवादो वीणासु | - | परीवादः + वीणासु। |
| नास्ति | - | न + अस्ति। |
| द्विजिह्वसङ्गृहीतिराहितुण्डिकेषु | - | द्विजिह्वसङ्गृहीतिः + आहितुण्डिकेषु। |

### विग्रहः।

| | | |
|---|---|---|
| नास्तिकता | - | नास्ति परलोकः इति मतिर्यस्य सः नास्तिकः तस्य भावः। अथवा नास्ति कं सुखं यस्य सः नास्तिकः तस्य भावः। |
| द्विजिह्वसङ्गृहीतिः | - | द्वे जिह्वे येषां ते द्विजिह्वाः, द्विजिह्वानां सङ्गृहीतिः। |
| आहितुण्डिकाः | - | आहितुण्डेन सर्पमुखेन दीव्यन्तीति आहितुण्डिकाः। |
| द्विजराजः | - | द्विजानां राजा। |
| दुश्शासनः | - | दुष्टं शासनं यस्य सः। |
| पङ्कजानां | - | पङ्कात् जायन्ते इति पङ्कजानि, तेषाम्। |
| जलजानां | - | जलात् जायन्ते इति जलजाः, तेषाम्। |
| नेत्रोत्पाटनम् | - | नेत्रयोः उत्पाटनम्। |

सार्वभौमयोगः - सार्वभौमस्य योगः अथवा सार्वभौमेन योगः ।
सूचीभेदः - सूच्या भेदः ।
करपत्रदारणम् - करपत्रस्य दारणम् ।
कण्टकयोगः - कण्टकस्य योगः अथवा कण्टकेन योगः ।

**कोशः।**

**नेत्रं वस्त्रे मथिगुणे तरुमूले विलोचने ।**

(अनेकार्थसमुच्चयः ।)

## व्याकरणकार्यम् ।

**कारकविभक्तिः।**

भाषायाः मुख्यमेककं भवति वाक्यम् । वाक्यं च कारकान्विता क्रिया । करोति क्रियां जनयतीति कारकम् । वस्तुतः वाक्यार्थस्य सम्यक् ज्ञानाय कारकाणां ज्ञानमपेक्षितम् । तत्र कारकाणि षट् । तानि च कर्ता - कर्म - करणं - सम्प्रदानम् - अपादानम् - अधिकरणं च ॥

पश्यत -

तिलकः पत्न्या साकं रेल् यानात् अवतीर्य त्रिचक्रिकया गृहं गत्वा कक्ष्यायां मात्रे मधुरम् अदात्।

| **पदानि** | तिलकः | मधुरं | त्रिचक्रिकया | मात्रे | यानात् | कक्ष्यायां |
|---|---|---|---|---|---|---|
| **विभक्तयः** | प्रथमा | द्वितीया | तृतीया | चतुर्थी | पञ्चमी | सप्तमी |
| **कारकाणि** | कर्ता | कर्म | करणं | सम्प्रदानम् | अपादानम् | अधिकरणम् |

तत्र **प्रथमा विभक्तिः ।**

**राजा, छेदः, योगः, परीवादः।**

**प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा । (२ - ३ - ४६)**

**प्रातिपदिकार्थमात्रे लिङ्गमात्राधिक्ये परिमाणमात्राधिक्ये संख्यामात्राधिक्ये च प्रथमाविभक्तिः स्यात् ।**

प्रातिपदिकार्थमात्रे - कृष्णः , श्रीः, ज्ञानम् इत्यादयः (नियतलिङ्गाः) ।
उच्चैः , नीचैः , इत्यादयः (अलिङ्गाः अव्ययशब्दाः) ।
लिङ्गमात्राधिक्ये - तटः,तटी,तटं – इत्यादयः (अनियतलिङ्गाः) ।
परिमाणमात्राधिक्ये - द्रोणः, त्रसरेणुः, पलम् इत्यादयः ।
संख्यामात्राधिक्ये - एकः, द्वौ, बहवः इत्यादयः।

**हे बाल !, हे राजन् !, भोस्तात!**

**सम्बोधने च। (२ - ३ - ४७)**

इह प्रथमा स्यात्। हे राम!, रे बाल!, भो रमे!, हे पितः!, भोः पुरुष!

**टिप्पणिः**

अभिमुखीकृत्य ज्ञापनम् - सम्बोधनम्। प्रातिपदिकार्थेन सह सम्बोधनेऽधिके गम्यमाने अपि प्रथमा स्यादिति सूत्रस्य फलितोऽर्थः। हे राम! त्वं गच्छ!। अत्र राम! इति सम्बोधनं भवति। रामं स्वाभिमुखं कृत्वा गच्छ इति ज्ञापयति।

## द्वितीया विभक्तिः।

**रामः पाठं पठति। राजा प्रजां परिपालयति।**

**कर्तुरीप्सिततमं कर्म। (१ - ४ - ४९)**

**कर्तुः क्रियया आप्तुमिष्टतमं कारकं कर्मसंज्ञं स्यात्। (कर्मार्थे द्वितीयाविभक्तिः भवति।)**

**टिप्पणिः।**

कर्तुः ईप्सिततमं कर्म इति पदच्छेदः। आप्तुम् इष्टम् ईप्सितम्। अत्यन्तमीप्सितम् ईप्सिततमम्। रामः ओदनं भुङ्क्ते इत्यत्र इष्टतमः ओदनः। रामः पयसा ओदनं भुङ्क्ते इत्यत्र इष्टतमः ओदनः भवति तेन तदेव कर्म। पयसः तु करणत्वमेव।

**राजुः देवं भजति।**

**कर्मणि द्वितीया। (२ - ३ - २)**

**अनभिहिते कर्मणि द्वितीया स्यात्। हरिं भजति।**

**टिप्पणिः।**

भक्तः हरिं भजति इति वाक्ये भक्तस्य भजनक्रियया प्राप्तुम् ईप्सिततमः हरिः। तेन हरिः कर्म।

**गोपालः गां दोग्धि पयः।**

**अकथितं च। (१-४-५१)**

**अपादानादिकारकैः अविवक्षितं कारकं कर्म भवति। कर्मणि द्वितीया।**

उदा - पाचकः तण्डुलान् ओदनं पचति। (दुह्याच् - इति वार्तिकं हस्तपुस्तके पश्यतु।)

**चिन्तामणिः सिंहासनम् अध्यास्त।**

**अधिशीङ्स्थासां कर्म। (१-४-४६)**

**अधिपूर्वाणां शीङ्, स्था, आस् धातूनाम् आधारः कर्म स्यात्। कर्मणि द्वितीया।**

उदा - हरिः वैकुण्ठम् अधिशेते।

**जनाः नगरम् अधिवसन्ति ।**

**उपान्वध्याङ्वसः । (१- ४ - ४८)**

**उपादिपूर्वस्य वसतेराधारः कर्म स्यात् । आदिशब्देन अनु, अधि, आङ् इत्येते उपसर्गाः सूच्यन्ते ।**

उदा - हरिः वैकुण्ठम् उपवसति ।

हरिः वैकुण्ठम् अनुवसति ।

बालः गृहम् आवसति ।

**अभितः कृष्णं गोपाः।**

**अभितः परितः समयानिकषाहाप्रतियोगेऽपि । (वार्तिकम्)**

परितः कृष्णम् । ग्रामं समया नदी । निकषा लङ्काम् । हा कृष्णाभक्तम् । बुभुक्षितं न प्रतिभाति किञ्चित् ।

## पठनप्रवर्तनानि ।

**पाठं व्याख्यानं च पठित्वा कक्ष्यायां संवादं प्रचालयतु । टिप्पणीं लिखित्वा अवतारयतु ।**

श्रद्धेयाः अंशाः -

- पाठं व्याख्यानं च पठित्वा नानार्थपदानां विवेचनम् ।
- सङ्घचर्चा ।
- पदार्थसंवादः।
- टिप्पणिलेखनम् ।
- अवतारणम् ।

**पाठं व्याख्यानं च पठित्वा आशयं स्वांशीकृत्य राज्ञः चिन्तामणेः भरणमधिकृत्य लघुविवरणं लिखतु ।**

श्रद्धेयाः अंशाः -

- संघचर्चा ।
- आशयस्वांशीकरणम् ।
- विवरणलेखनम् ।

**पाठम् उच्चैः पठित्वा आशयं विशदयतु ।**

श्रद्धेयाः अंशाः -

- पाठभागस्य उच्चैर्वाचनम् ।
- आशयस्वांशीकरणम् ।
- विशदीकरणम् ।

**सङ्घे अधोदत्तस्य पद्यस्य विशकलनं कृत्वा अर्थभेदं स्वांशीकरोतु। अलङ्कारस्य लक्षणम् उदाहरणं च ज्ञात्वा समानालङ्कारयुक्तपदानि पाठभागात् चित्वा लक्ष्यलक्षणसमन्वयं करोतु।**

विना गोरसं को रसो भोजनानां
विना गोरसं को रसो भूपतीनाम्।
विना गोरसं को रसः कामिनीनां
विना गोरसं को रसः पण्डितानाम्॥

**अन्वयः** - गोरसं विना भोजनानां को रसः ? गोरसं विना भूपतीनां को रसः? गोरसं विना कामिनीनां को रसः ? गोरसं विना पण्डितानां को रसः ?

अत्र गो शब्दस्य चत्वारःअर्थाःसन्ति। प्रथमपादस्थगोरसशब्दस्य तक्र - दधि - क्षीरादयः अर्थाः। द्वितीयपादस्थगोरसशब्दस्य सस्यसमृद्धा भूमिः इत्यर्थः। तृतीयपादस्थगोरसशब्दस्य नयनचारुता इत्यर्थः। चतुर्थपादस्थगोरसशब्दस्य वाक् इत्यर्थः। भोजनं- भक्षणं, भूपतिः - राजा, कामिनी - सुन्दरी, पण्डितः - ज्ञानी।

**सारांशः** - भोजनवेलायां तक्रादिकं नास्ति चेत् भोजनं स्वादु न स्यात्। राज्ये सस्यसमृद्धिः नास्ति चेत् राज्ञां सुखं न स्यात्। कामिनीनां नयनचारुतां विना को रसः। पण्डितानां वाक्चातुरी नास्ति चेत् को रसः इति भावः। एकवृन्तगतानेकफलन्यायेन गोरसशब्दस्य अनेकार्थ - प्रतिपादनात् श्लेषालङ्कारः।
गो शब्दस्य नानार्थाः - स्वर्गः, इषुः, वाक्, वज्रः, दिक्, नेत्रं, घृणिः, भूः, जलम् इत्यादयः।

**श्लेषालङ्कारः।**

नानार्थसंश्रयःश्लेषःवर्ण्यावर्ण्योभयाश्रितः।
सर्वदो माधवःपायात् स योऽगंगामदीधरत्॥

नानार्थस्य अनेकार्थगोचरस्य शब्दस्य विन्यासःश्लेषः इति लक्षणम्। वर्ण्यावर्ण्योभयास्पदः- प्रकृताप्रकृतोभयविषयः। **सर्वदो माधवःपायात् स योऽगंगामदीधरत्** इति उदाहरणम्।

सर्वदः - सर्वं ददाति इति सर्वदः - सकलाभीष्टप्रदाता। माधवः - मा - लक्ष्मीः, तस्याः धवः- पतिः (विष्णुः) पायात् - रक्ष्यात्, यः अगं पर्वतं (गोवर्धनगिरिं) गां - पृथिवीं च, अदीधरत् - धृतवान् इत्येकः प्रकृतार्थः। सर्वदा उमाधवः - उमायाः धवः (शिवः) यः गङ्गामदीधरत् (जडायां गंगां धृतवान्) सः पायादिति द्वितीयोऽप्यर्थः प्रकृत एवेति प्रकृतश्लेषः।

श्रद्धेयाः अंशाः -

- ❖ दत्तभागस्य विशकलनम्।
- ❖ अलङ्कारज्ञानम्।
- ❖ पाठभागात् उदाहरणानां निर्धारणम्।
- ❖ टिप्पणीलेखनम्।

### अध्यापकपुस्तकं पठित्वा सुबन्धुं वासवदत्तां च अधिकृत्य टिप्पणिं लिखतु।

श्रद्धेयाः अंशाः -

- ❖ अध्यापकपुस्तकस्य पठनम्।
- ❖ आशयस्वांशीकरणम्।
- ❖ टिप्पणीलेखनम्।

### पट्टिकां विशदयतु।

| प्रातिपदिकार्थः। | लिङ्गम्। | परिमाणम्। | वचनम् (संख्या)। |
|---|---|---|---|
| उच्चैः, नीचैः कृष्णः, श्रीः, ज्ञानम् | तटः, तटी, तटम् | द्रोणो व्रीहिः | एकम्, द्वौ, बहवः |

श्रद्धेयाः अंशाः -

- ❖ निर्दिष्टसूत्रस्य पठनम्।
- ❖ सङ्घे स्थित्वा चर्चा।
- ❖ आशयं स्वांशीकृत्य विशदीकरणम्।

### अधोदत्तानि सूत्राणि वार्तिकानि च पठित्वा टिप्पणिं लिखतु विचारस्पर्धां च चालयतु।

◆संबोधने च। ◆कर्तुरीप्सिततमं कर्म।

◆कर्मणि द्वितीया। ◆अकथितञ्च।

**◆दुह्याच्पच् दण्ड् रुधिप्रच्छिचिब्रूशासुजिमथ्मुषाम्।**

**कर्मयुक्स्यादकथितं तथा स्यान्नीहृकृष्वहाम्॥** (वार्तिकम्) (HB पश्यतु)

◆अधिशीङ्स्थासां कर्म। ◆उपान्वध्याङ्वसः।

◆अभितः परितः समयानिकषाहाप्रतियोगेऽपि।

श्रद्धेयाः अंशाः -

- ❖ व्याकरणकार्यस्य पठनम् ।
- ❖ सङ्घे स्थित्वा चर्चा ।
- ❖ सूत्राणां वार्तिकानां च सोदाहरणम् अर्थविशदीकरणम् ।
- ❖ विचारस्पर्धा ।

### अधोरेखाङ्कितानां पदानां विभक्तिं निर्धार्य सूत्रं विशदयत।

१. ग्रामम् अभितः जलाशयः।
२. बालः गृहम् आवसति ।
३. हरिः वैकुण्ठम् अध्यास्ते ।

श्रद्धेयाः अंशाः -

- ❖ व्याकरणकार्यस्य पठनम् ।
- ❖ विभक्तिज्ञानम् ।
- ❖ सूत्रनिर्धारणं विशदीकरणं च ।

### मुख्यकर्म गौणकर्म च चित्वा लिखत ।

१. रमेशः ग्रामम् अजां नयति । २. गोपालः गां दोग्धि पयः ।
३. अध्यापकः छात्रं धर्मं शास्ति ।

श्रद्धेयाः अंशाः -

- ❖ व्याकरणकार्यस्य पठनम् ।
- ❖ सङ्घे स्थित्वा चर्चा ।
- ❖ मुख्यगौणकर्मणोः विविच्य लेखनम् ।

### अभ्यासपत्रिका।

**पठितसूत्रानुसारं पूरयतु । सूत्रार्थं च वदतु ।**

१). ---- भजति । (हरिः) २). रामः ---- भुङ्क्ते । (ओदनः)
३). हरिः----अधिशेते । (वैकुण्ठः) ४). ---- परितः वृक्षाः सन्ति । (विद्यालयः)
५). अध्यापकः ---- अधिवसति । ( ग्रामः) ६). हे ---- त्वं कुत्र निवससि ? (सखा)

श्रद्धेयौ अंशौ -

- ❖ वैयक्तिकप्रवर्तनम् ।
- ❖ उचितविभक्तिरूपाण्युपयुज्य पूरणम् ।

## अनुबन्धः।

### १. पाठभागस्य विस्तृतव्याख्या -

**यत्रेति**-यस्मिन् चिन्तामणौ राजनि, धरणिमण्डलं - भूवलयं, शासति (सति) - शासनं कुर्वति सति, वादेषु - शास्त्रार्थेषु, छलं - वाक्छलं, निग्रहः - प्रतिज्ञाहान्यादिः, न्यायशास्त्रोक्तः, तयोः प्रयोगः आसीत्। न तु प्रजासु छलस्य कपटस्य निग्रहस्य- बन्धनादेः, प्रयोगः उपयोगोऽभवत् - प्रजानां धर्मवृत्तित्वात् बन्धनदण्डादेरभावश्च। छलजातिनिग्रहादयः वादेषु एव आसन्नित्यर्थः। **नास्तिकेति** - नास्तिकस्य भावः नास्तिकता, चार्वाकेषु - लोकायतिकेषु, बृहस्पतिमतानुयायिषु आसीत्। न तु प्रजासु नास्तिकतादुःखमासीत्। नास्ति किञ्चिद् इत्यस्य भावः नास्तिकता। **कण्टकेति**- कण्टकयोगे (नि)योगेषु कण्टकस्य योगः कण्टकयोगः यद्वा कण्टकस्य प्रयोगः कण्टकप्रयोगः। कण्टकस्य सूच्यग्रस्य योगः अङ्गुल्यग्रेषु - नखाग्रेषु । सूचिप्रवेशः- कण्टकप्रयोगः। महापराधिनां कृते तादृशरीत्या दण्डनं प्राचीनकाले आसीत्। न हि तादृशाः दण्डनीयाः प्रजाः सन्ति। कण्टकस्य पुलकमित्यपरार्थः अस्ति। कण्टकयोगो योगेषु - योगिभिः ब्रह्मसाक्षात्कारवेलायाम् अनुभूता अनुभूतिरेवासीत् । पुलकं - रोमाञ्चमित्यर्थः। **परीवाद इति** - परीवादः- वीणातन्त्री, वीणासु वल्लकीषु परीवादः - परितः सामस्त्येन सम्यगित्यर्थः, वादनं यद्वा वीणावादनदण्डसंबन्धः आसीत् न तु लोकेषु परस्परनिन्दा आसीत्। **खलेति** - खलः उलूखलं, (उरल् इति भाषायाम्) संयोगः - संबन्धः, शालिषु - धान्येषु (कलमः, धान्यः, शाली) एवासीत्। खलानाम् उलूखलबन्धनं एका दण्डनरीतिः आसीत्। यद्वा खलस्य धान्यमर्दनभूमेः संयोगः संबन्धः शालिषु - धान्येषु आसीत्। शालयः खलेषु मर्द्यन्ते, प्रजासु तु खलस्य पिशुनस्य संबन्धो नासीत् । **द्विजिह्वेति** - द्विजिह्वानां सर्पाणां सङ्गृहीतिः - सङ्ग्रहणम्, आहितुण्डिकेषु सर्पोपजीविषु (व्यालग्राहिषु) आसीत् । यद्वा द्विजिह्वानां मिथ्याभाषणशीलानां निन्दकानां संग्रहः तस्य प्रजासु नासीत्। **करच्छेद इति**- करच्छेदः कुड्मल (क्लृप्ता) करग्रहणेषु। करच्छेदः – करेण वृन्तस्य छेदः, कुड्मलग्रहणेषु – मुकुलापचयेषु (मुकुलः - पूमोट्ट इति भाषायाम्) न तु प्रजासु करस्य छेदः, तादृशस्य दण्डनीयस्याभावात्। यद्वा करस्य राजदेयभागस्य छेदः - विभङ्गः क्लृप्तः यथायथं निश्चिता ये करा राजग्राह्यभागास्तेषां ग्रहणेषु - आदानेषु, राजग्राह्यभागस्य छेदो - न्यूनीकरणमासीत्, यदा वर्षाभावादिना धनागमे न्यूनता तदा राजग्राह्यभागोऽपि राज्ञा न्यूनीक्रियते स्म इति भावः। प्रजासु तु करस्य हस्तस्य छेदः - कर्तनं दण्डरूपेण न जायते स्म। तादृशदण्डयोग्यापराधाभावात्। **नेत्रेति**- नेत्रम् इत्यस्य वस्त्रम्, अक्षि, भूरुहं (वृक्षं), मूलम् इत्यादयः अर्थाः सन्ति। नेत्राणामुत्पाटनं - वृक्षवल्कलानामुत्पाटनं कर्तनम् उन्मूलनं वा मुनीनां - यतीनां, जायते स्म, न तु प्रजानां नेत्रयोः - चक्षुषोः उत्पाटनं भवति स्म। तादृग्दुष्कर्माभावात् नेत्रोत्पाटनरूपं दण्डनं न आसीत् । **द्विजेति**- द्विजराजः-चन्द्रः, विरुद्धता – प्रातिकूल्यं, पङ्कजानां - कमलानामासीत्, उदिते चन्द्रे

पङ्कजानि निमीलितानि भवन्ति । न तु प्रजानां, द्विजराजानां - श्रेष्ठब्राह्मणानां, विरुद्धता - प्रातिकूल्यमासीत्। सर्वा एव प्रजाः तत्प्रतिपादितयज्ञाद्यनुष्ठानसरणिमनुवर्तन्ते स्म इति भावः। **सार्वभौम इति** - सार्वभौमः - अष्टदिङ्नागेषु एकः भवति, योगः - संबन्धः, सार्वभौमस्य तदन्तःपातित्वादिति भावः। न तु अन्येषां नृपतीनां सार्वभौमपदेन सम्बन्धः। अस्यैव चक्रवर्तित्वात् । **अग्नीति** - अग्निना तुलया च शुद्धिः वर्णमानज्ञानं, सुवर्णानां - काञ्चनानामासीत्। न तु लोकानां तादृशशुद्धियोग्यापराधाभावात् इति भावः। यद्वा अग्निशुद्धिः तुलाशुद्धिः च प्राकृतदण्डनरीतिः भवति, अपराधाभावात् तादृशः दण्डनरीतिः नासीदित्यर्थः। **सूचीति**- सूच्या - सीवनसाधनद्रव्येण, भेदः सूत्रप्रवेशनाय रन्ध्रविधानं, मणीनां मुक्तानामभवत्। न तु लोकानां सूचेर्दृष्टिभेदो - विदारणमासीत्, तादृशापराधाभावात्। **शूलेति** - शूलः शूलमिति पदभेदौ स्तः। शूलः - रोगः, शूलम् - रुगायुधः (शस्त्रक्रियोपकरणम्) शूलः इत्यस्य शूलव्यथा - प्रसवामयेन भङ्गः, शूलेनैव क्रियते । शूलेनोदरपीडया भङ्गः आमर्दः कष्टमिति यावत्, युवतीनां गर्भमोचनव्यापारोऽभवत् । यद्वा शूलेष्वारोपणीयो दण्ड्यो नास्तीति भावः। **दुश्शासनेति**- दुश्शासनस्य - दुर्योधनानुजस्य दर्शनं महाभारते एव। न तु प्रजासु दुश्शासनस्य दुष्टशासनस्य दर्शनं निरीक्षणमभवत् । **करेति**- जलजानां - कमलानां, करैः - सूर्यकिरणैः, पत्राणां - किसलयानां, दारणं - विकासनमभवत्। न तु लोकानां करपत्रेण क्रकचेन (अरवुकत्ति इति भाषायाम्) दारणं - भेदनमासीत्, करपत्रदारणं नाम दण्डविशेषः। एवम् उपर्युक्तप्रकारेण शोभनम् आसीत् चिन्तामणेः राजनीतिः इति तात्पर्यम्।

## २. पाठभागस्य भाषान्तरीकरणम्।

മഹാകവി സുബന്ധു രചിച്ച വാസവദത്ത എന്ന കഥയുടെ ആരംഭഭാഗത്ത് വിന്ധ്യാചലപ്രദേശത്തെ ചിന്താമണി എന്ന രാജാവിന്റെ ഭരണത്തെക്കുറിച്ച് വർണ്ണിക്കുന്നതാണ് പാഠഭാഗം.

ചിന്താമണിരാജാവിന്റെ ഭരണകാലത്ത് വഞ്ചകന്മാരെയും കാപട്യക്കാരെയും മറ്റും ബന്ധനത്തിലാക്കേണ്ടി വന്നിട്ടില്ല. **छलनिग्रहप्रयोगः** എന്നത് ന്യായശാസ്ത്രവാദങ്ങളിൽ മാത്രമേ ഉണ്ടായിരുന്നുള്ളു. **नास्तिकता - न अस्ति किञ्चित्-** എന്നുള്ളത് ചാർവ്വാകരിൽ മാത്രമേ ഉണ്ടായിരുന്നുള്ളു. ജനങ്ങൾ പൊതുവേ നാസ്തികതയിൽ (ദാരിദ്ര്യാവസ്ഥയിൽ) ആയിരുന്നില്ല. **कण्टकयोग** നഖത്തിന്റെ ഇടയിൽ സൂചിമുന കുത്തിയിറക്കുന്ന ശിക്ഷാരീതി സദ്ഭരണമായതിനാൽ ഉണ്ടായിരുന്നില്ല. **परीवादो वीणासु** അപശ്രുതി വീണാതന്ത്രി മീട്ടുമ്പോൾ മാത്രമാണുണ്ടായിരുന്നത്. ജനങ്ങളിൽ അപവാദശീലർ ഉണ്ടായിരുന്നില്ല എന്നർത്ഥം. **खलसंयोगः शालिषु** ധാന്യമണികളുടെ മർദ്ദനം മാത്രമാണ് ഉരലിൽ നടന്നിരുന്നത്. അല്ലാതെ ഉലൂഖലബന്ധനം പോലുള്ള ശിക്ഷാരീതി അക്കാലത്ത് ഉണ്ടായിരുന്നില്ല. **द्विजिह्वसङ्गृहीतिराहितुण्डिकेषु** സർപ്പങ്ങളെ പിടിക്കുക എന്നത് പാമ്പാട്ടികൾ മാത്രമാണ് ചെയ്തിരുന്നത്. അല്ലാതെ (ഇരട്ടനാവുള്ള) മിഥ്യാഭാഷണം ശീലമുള്ളവരുടെ ഒത്തുചേരൽ ആ കാലഘട്ടത്തിൽ ഉണ്ടായിരുന്നില്ല. **करच्छेदः क्लृप्त - करग्रहणेषु** അതുപോലെ കൈ മുറിച്ചു കളയുന്നരൂപത്തിലുള്ള ശിക്ഷാസമ്പ്രദായം ആ കാലഘട്ടത്തിൽ ഉണ്ടായിരുന്നില്ല. മറ്റൊരുവിധത്തിൽ പറഞ്ഞാൽ ക്ലിപ്തപ്പെടുത്തിയ അതായത് നിശ്ചയിക്കപ്പെട്ട കരങ്ങൾ (നികുതി) അതിവൃഷ്ടി, അനാവൃഷ്ടി (പ്രകൃതി

ക്ഷോഭങ്ങളാൽ) എന്നിവയാൽ ജനങ്ങൾ ബുദ്ധിമുട്ടുമ്പോൾ രാജാവ് കരംകുറവ് വരുത്തിയിരുന്നുവെന്നും അർത്ഥം പറയാം.

**नेत्रोत्पाटनं मुनीनां** നേത്രോത്പാടനം - (നേത്രം - വസ്ത്രം , വൃക്ഷം, കിഴങ്ങുവർഗ്ഗങ്ങൾ എന്നു വിവിധ അർത്ഥങ്ങൾ പറയാം) വൃക്ഷത്തിന്റെ തോല് ഉത്പാടനം ചെയ്തെടുത്ത് മുനിമാർക്ക് വസ്ത്രങ്ങൾ ഉണ്ടാക്കുന്നതിനും കിഴങ്ങുവർഗ്ഗങ്ങൾ ഉത്പാടനം (മുറിച്ചെടുത്ത്) ചെയ്ത് ഭക്ഷണത്തിനും ഉപയോഗിച്ചിരുന്നു എന്നല്ലാതെ കണ്ണ് ചൂഴ്ന്നെടുക്കുന്ന രീതിയിലുള്ള ശിക്ഷാസമ്പ്രദായം ആ കാലത്ത് ഉണ്ടായിരുന്നില്ല. **द्विजराजविरुद्धता पङ्कजानां** ചന്ദ്രനു വൈരുധ്യം താമരയോട് മാത്രമായിരുന്നു. അല്ലാതെ ബ്രാഹ്മണശ്രേഷ്ഠന്മാരോടു പ്രജകൾക്ക് വൈരുദ്ധ്യമില്ലായിരുന്നു എന്ന് അർത്ഥം. **सार्वभौमयोगो दिग्गजस्य** സാർവഭൗമയോഗമെന്നത് എല്ലാ ഭൂമീശ്വരന്മാർക്കും ചേരുന്നതാണ്. എന്നാൽ ചക്രവർത്തിയോഗം ചിന്താമണിരാജാവിനു മാത്രം ആയിരുന്നുവെന്നും അർത്ഥം. സാർവഭൗമൻ എന്ന പേര് ദിഗ്ഗജങ്ങളിൽ ഒന്നിന് മാത്രമേ ഉണ്ടായിരുന്നുള്ളു. **अग्नितुलाशुद्धिः सुवर्णानां** അഗ്നിശുദ്ധിയും തുലാശുദ്ധിയും സ്വർണ്ണത്തിന്റെ പരിശുദ്ധിയും അളവും സംബന്ധിച്ചുമാത്രമാണുണ്ടായിരുന്നത്. അല്ലാതെ ശിക്ഷാരീതികളായിട്ട് അഗ്നിശുദ്ധിയും തുലാശുദ്ധിയും ആ കാലഘട്ടത്തിൽ ഉണ്ടായിരുന്നില്ല.

**सूचीभेदो मणीनां** സൂചികൊണ്ടുള്ള ഭേദം (മുറിവുണ്ടാക്കൽ), അതായത് സൂചികുത്തിയിറക്കുന്ന തരത്തിലുള്ള ശിക്ഷകൾ ഉണ്ടായിരുന്നില്ല. (ശൂലഃ എന്നും ശൂലം എന്നും രണ്ടുതരത്തിൽ പദങ്ങൾ ഉണ്ട്. ശൂലഃ എന്നതിനു രോഗം എന്നും ശൂലം എന്നതിന് രുഗായുധം എന്നും അർഥം) ശൂലവ്യഥ - പ്രസവവേദനക്കുള്ള ഭംഗം - ഇല്ലാതാക്കുന്നതിന് ശസ്ത്രക്രിയാ ഉപകരണം പോലെയാണ് അത് ഉപയോഗിച്ചിരുന്നത് അല്ലാതെ ശൂലം കൊണ്ടുള്ള ശിക്ഷാസമ്പ്രദായങ്ങൾ ആ കാലഘട്ടത്തിൽ ഉണ്ടായിരുന്നില്ല. **दुःशासनदर्शनं भारते** ദുശ്ശാസനനെന്ന പ്രയോഗം മഹാഭാരതത്തിൽ മാത്രമായിരുന്നു. അല്ലാതെ ദുഷ്ടശാസനമെന്നത് ഇല്ലായിരുന്നു. **करपत्रदारणं जलजानां** താമരയിതളുകൾ വിരിയുന്നതിന് സൂര്യകിരണങ്ങൾ സഹായകരമായി ഭവിച്ചിരുന്നു. അല്ലാതെ കരപത്രദാരണം എന്ന ശിക്ഷാരീതി ഉണ്ടായിരുന്നില്ല. ഇത്തരത്തിൽ ബഹുവിധാർത്ഥത്തിൽ ചിന്താമണിരാജാവിന്റെ ഭരണത്തെ സദ്ഭരണമായി വിലയിരുത്താവുന്നതാണ്.

## ३. अष्टदिग्गजाः ।

**ऐरावतः पुण्डरीको वामनः कुमुदोऽञ्जनः।**
**पुष्पदन्तः सार्वभौमः सुप्रतीकश्च दिग्गजाः।।**

ऐरावतः - पूर्वस्यां दिशि। पुण्डरीकः - दक्षिणपूर्वस्यां दिशि। वामनः - दक्षिणदिशि। कुमुदः - दक्षिण - पश्चिमायां दिशि। अञ्जनः - पश्चिमदिशि। पुष्पदन्तः - उत्तरपश्चिमायां दिशि। सार्वभौम : - उत्तरस्यां दिशि। सुप्रतीकः - उत्तरपूर्वस्यां दिशि।

### शब्दकोशः ।

| संस्कृतम् | अर्थः | कैरली | आङ्गलम् |
|---|---|---|---|
| शासति | शासनं कुर्वति(सति) | ഭരണം നടത്തവേ | While governing |
| धरणिमण्डलं | भूवलयं | ഭൂമണ്ഡലം | The Earth |

| संस्कृतम् | अर्थः | कैरली | आङ्गलम् |
|---|---|---|---|
| छलम् | कापट्यं | കാപട്യം | Hypocrisy |
| निग्रहः | बन्धनं | തടവ് | Imprisonment |
| नास्तिकता | निर्धनता/ निरीश्वरवादः | ദാരിദ്ര്യം / നിരീശ്വരവാദം | Poverty/ Atheism |
| कण्टकः | सूची | സൂചി | Needle |
| नियोगः | नियोजनम् | നിയോഗിക്കൽ | Appointment |
| परीवादः | वीणातन्त्रिः / अपवादः | വീണാതന്ത്രി/അപവാദം | The string of Veenas / Slander |
| खलः | पिशुनः / उलूखलम् | കള്ളൻ / ഉരൽ | Thief /Wooden Mortar |
| शालिः | धान्यं | ധാന്യം | Grain |
| जिह्वा | रसना | നാവ് | Tongue |
| द्विजिह्वः | सर्पः / मिथ्याभाषणशीलः | സർപ്പം / കള്ളംപറച്ചിൽ ശീലമാക്കിയവർ | Snake / Liar |
| अहिः | सर्पः | സർപ്പം | Snake |
| आहितुण्डिकः | व्यालग्राही | പാമ്പാട്ടി | Snake charmer |
| करच्छेदः | करस्य न्यूनीकरणं / करस्य कर्तनम् | നികുതി കുറയ്ക്കുക/ കൈ വെട്ടിക്കളയുക. | Tax reducing/ Amputation of the hand |
| कुड्मलम् | मुकुलम् | പൂമൊട്ട് | Bud |
| कलृप्तकरः | यथायथं निश्चितःकरः | നിശ്ചയിച്ച നികുതി | Due Tax |
| नेत्रोत्पाटनं | चक्षुरुत्पाटनं | കണ്ണ് ചൂഴ്ന്ന് എടുക്കുക. | Rooting out of eyes |
| द्विजराजः | चन्द्रः / ब्राह्मणश्रेष्ठः | ചന്ദ്രൻ/ബ്രാഹ്മണശ്രേഷ്ഠൻ | Moon / Noble Brahmin |
| विरुद्धता | प्रातिकूल्यं | എതിർപ്പ് | Objection |
| सार्वभौमः | सर्वभूमीश्वरः | ചക്രവർത്തി | Emperor |
| दिग्गजः | दिङ्नागः | ദിഗ്ഗജം | Elephant representing direction |
| सुवर्णं | काञ्चनं | സ്വർണ്ണം | Gold |
| मणिः | मुक्ता | മുത്ത് | Pearl |
| शूलः | रोगः | രോഗം | Disease |
| शूलं | आयुधविशेषः | ശൂലായുധം | A weapon |
| करः | सूर्यकिरणः | സൂര്യരശ്മി | Ray of Sun |
| दारणं | विकासनम्/भेदनम् | വിരിയൽ/ഭേദനം | Blossoming / Breaking |
| जलजं | पद्मं | താമര | The Lotus |
| करपत्रम् | क्रकचम् | അറവുകത്തി | Knife |
| पत्रम् | किसलयम् | പൂമൊട്ട് | Bud of flower |

## किमधिगतम्।

| पठनप्रवर्तनानि। | स्वांशीकृतम्। | भागिकतया स्वांशीकृतम्। | प्रगतये प्रयत्नः करणीयः। |
|---|---|---|---|
| नानार्थपदानां टिप्पणिं लिखित्वा अवतारणं कृतम्। | | | |
| आशयं स्वांशीकृत्य विवरणं कृतम्। | | | |
| उच्चैः पठित्वा आशयविशदीकरणं कृतम्। | | | |
| पद्यं व्याख्यानं च पठित्वा अलङ्कारलक्षणं स्वांशीकृत्य टिप्पणीलेखनं कृतम्। | | | |
| सुबन्धुं वासवदत्तां च अधिकृत्य टिप्पणीलेखनं कृतम्। | | | |
| पङ्क्तिकायाः विशदीकरणं कृतम्। | | | |
| सूत्राणां वार्तिकानां च टिप्पणीलेखनं कृतम्। विचारस्पर्धा च चालिता। | | | |
| रेखाङ्कितानां पदानां विभक्तिं निर्धार्य सूत्रविशदीकरणं कृतम्। | | | |
| मुख्यकर्म गौणकर्म च चित्वा लेखनं कृतम्। | | | |
| अभ्यासपत्रिकायाः पूरणं कृतम्। | | | |

**फलमिदमेव हि विदुषां शुचिपदवाक्यप्रमाणशास्त्रेभ्यः।**

**यत्संस्कारो वाचां वाचश्च सुचारुकाव्यफलाः॥**

(काव्यालङ्कारः - रुद्रटः)

**गद्यपद्यमिश्रात्मकात्परं**
**रूपकपठनायागच्छतु॥**



# द्वितीयम् एककम्

# संस्कृतिधारा ।

## आमुखम् ।

विभिन्नाशयानां विभिन्नानुभवानाम्
विभिन्नसंस्कृतीनां च एकसूत्रता भवति मानविकता ।
एषा दुःखितेभ्यः कालदेशभेदं विना दीयमाना अनुकम्पा सहानुभूतिः च भवति । एषा पतितान् उन्नीय मानवजीवनस्य मुख्यधारायां प्रतिष्ठापयति ।
मानविकतायाः परिस्फूर्तये वयं विश्वमानवाः भवामः।
पारस्पर्येण जीवामः। अपरस्य वाक्यानि अपि शृणुमः ।
स्नेहं दयां सौख्यं च अन्येभ्यः दद्मः। अस्मिन्नेकके पाठद्वयं विद्यते ।
महाकवेर्भासस्य मध्यमव्यायोगः इत्यस्मात् रूपकात् स्वीकृतः
' मध्यमस्य दीनता ' इति तृतीयः पाठः। तथा कैरलीसाहित्यात्
अनूदितेभ्यः काव्येभ्यः उद्धृतान् त्रीन् श्लोकान् एवं
नारायणीयात्, निवातकवचकालकेयवधं इति कथाकेल्याः
एकैकं श्लोकं च समायोज्य रचितः
' काव्यमञ्जरी ' इति
चतुर्थः पाठः।

## तृतीयः पाठः

# मध्यमस्य दीनता ।

**पाठप्रवेशः।**

चालिश्शेरिसंस्कृतविद्यालयात् केचन छात्राः संस्कृताध्यापकेन साकं संस्कृतनाटकानि द्रष्टुं कलोत्सववेदिकाम् अगच्छन्। तदा तत्र उपस्थितेषु छात्रेषु एकः अध्यापकम् एवम् अपृच्छत्।

छात्रः : आचार्य! कति संस्कृतनाटकानि अत्र द्रष्टुं शक्नुमः?

आचार्यः : माध्यमिकस्तरे त्रीणि नाटकानि सन्ति ।
उच्चमाध्यमिकस्तरे अपि त्रीणि नाटकानि द्रष्टुम् अवसरः अस्ति ।

छात्रः : प्रथमम् उच्चमाध्यमिकविभागस्य नाटकानि वा ?

आचार्यः : आम्। प्रथमं भासस्य मध्यमव्यायोगं पश्यामः।
तदनन्तरं भवभूतेः 'उत्तररामचरितम्',
ततःशक्तिभद्रस्य आश्चर्यचूडामणिं च ।

छात्रः : कदा आरम्भः?

आचार्यः : इदानीमेव । (सर्वे मध्यमव्यायोगम् पश्यन्ति) ।



## आमुखम्।

भारतीयनाटककर्तृषु प्रथमगणनीयः भवति महाकविःभासः। तेन विरचितेषु त्रयोदशरूपकेषु अन्यतमः भवति मध्यमव्यायोगः। दशरूपकप्रकारेषु व्यायोगविभागे अन्तर्भवति मध्यमव्यायोगः। अस्य कथाबीजं महाभारतात् स्वीकृतं भवति । व्यायोगेऽस्मिन् पाण्डवमध्यमः भीमः, भीमस्य हिडिम्बायां जातः घटोत्कचः च मुख्यकथापात्रे स्तः। हिडिम्बाभीमयोः पुनस्समागमेन तथा मध्यमपुत्रस्य कुटुम्बेन समागमे च कथा समाप्यते। वनमार्गेण सञ्चरतः ब्राह्मणकुटुम्बस्य मार्गविघ्नं कुर्वतः घटोत्कचस्य च मिथः प्रवृत्तं संभाषणमेव पाठभागस्य सन्दर्भः। मातुः हिडिम्बायाः आहारार्थं मानुषम् अन्विष्य आगतेन घटोत्कचेन मध्यमः ब्राह्मणपुत्रः गृहीतः। रक्षोपायम् अदृष्ट्वा स्वीयान् प्राणान् त्यक्तुमुद्युक्तस्य तस्य अतिदयनीयाम् अवस्थां महाकविः भासः भावपूर्णतया वर्णयति।

## कथापात्राणि।

| | | |
|---|---|---|
| वृद्धः | - | केशवदासो नाम ब्राह्मणः। |
| ब्राह्मणी | - | वृद्धस्य भार्या। |
| प्रथमः | - | वृद्धस्य ज्येष्ठपुत्रः। |
| द्वितीयः | - | वृद्धस्य द्वितीयपुत्रः (मध्यमः)। |
| तृतीयः | - | वृद्धस्य कनिष्ठपुत्रः। |
| घटोत्कचः | - | भीमस्य हिडिम्बायाश्च पुत्रः। |
| भीमसेनः | - | पाण्डवमध्यमः। |
| हिडिम्बा | - | भीमस्य पत्नी (राक्षसी)। |



(रङ्गे घटोत्कचेन निरुद्धः सपरिवारः केशवदासो नाम ब्राह्मणः।)

**घटोत्कचः** - अस्ति मे तत्र भवती जननी। तयाहमाज्ञप्तः -

पुत्र ! ममोपवासनिसर्गार्थमस्मिन् वनप्रदेशे कश्चिन्मानुषः परिमृग्यानेतव्य इति। ततो मयासादितो भवान्।

**पत्न्या चारित्रशालिन्या द्विपुत्रो मोक्षमिच्छसि।**
**बलाबलं परिज्ञाय पुत्रमेकं विसर्जय॥ (१२)**

**वृद्धः** - हम् ! भो ! राक्षसापसद! किमहमब्राह्मणः ?

**ब्राह्मणः श्रुतवान् वृद्धः पुत्रं शीलगुणान्वितम्।**
**पुरुषादस्य दत्वाहं कथं निर्वृतिमाप्नुयाम्॥ (१३)**

**घटोत्कचः**- **यद्यर्थितो द्विजश्रेष्ठ! पुत्रमेकं न मुञ्चसि।**
**सकुटुम्बं क्षणेनैव विनाशमुपयास्यसि॥ (१४)**

**वृद्धः** - एष एव मे निश्चयः -

**कृतकृत्यं शरीरं मे परिणामेन जर्जरम्।**
**राक्षसाग्नौ सुतापेक्षी होष्यामि विधिसंस्कृतम् ॥ (१५)**

**ब्राह्मणी** - आर्य! मा मैवम्। पतिमात्रधर्मिणी पतिव्रतेति नाम। गृहीतफलेन एतेन शरीरेण आर्यं कुलं च रक्षितुम् इच्छामि।

**घटोत्कचः** - भवति ! न खलु स्त्रीजनोऽभिमतस्तत्रभवत्याः।

**वृद्धः** - अनुगमिष्यामि भवन्तम्।

**घटोत्कचः** - आः! वृद्धस्त्वमपसर।

**प्रथमः** - भोस्तात ! ब्रवीमि खलु तावत् किञ्चित्।

**वृद्धः** - पुत्र ! कथय।





प्रथमः - मम प्राणैर्गुरुप्राणानिच्छामि परिरक्षितुम्।
रक्षणार्थं कुलस्यास्य मोक्तुमर्हति मां भवान्॥ (१६)

द्वितीयः - आर्य ! मा मैवम्।
ज्येष्ठः श्रेष्ठः कुले लोके पितॄणां च सुसम्प्रियः।
ततोऽहमेव यास्यामि गुरुवृत्तिमनुस्मरन्॥ (१७)

तृतीयः - आर्य ! मा मैवम्।
ज्येष्ठो भ्राता पितृसमः कथितो ब्रह्मवादिभिः।
ततोऽहं कर्तुमस्म्यर्हो गुरूणां प्राणरक्षणम् ॥ (१८)

प्रथमः - वत्स ! मा मैवम्।
आपदं हि पिता प्राप्तो ज्येष्ठपुत्रेण तार्यते।
ततोऽहमेव यास्यामि गुरूणां प्राणरक्षणात्॥ (१९)

वृद्धः - ज्येष्ठमिष्टतमं न शक्नोमि परित्यक्तुम्।

ब्राह्मणी - यथार्थो ज्येष्ठमिच्छति तथा अहमपि कनिष्ठमिच्छामि।

द्वितीयः - पित्रोरनिष्टः कस्येदानीं प्रियः।

घटोत्कचः- अहं प्रीतोऽस्मि, शीघ्रमागच्छ।

द्वितीयः- धन्योऽस्मि यद् गुरुप्राणाः स्वैः प्राणैः परिरक्षिताः।
बन्धुस्नेहाद्धि महतः कायस्नेहस्तु दुर्लभः॥ (२०)



**घटोत्कचः** - अहो ! स्वजनवात्सल्यं अस्य ब्राह्मणवटोः।

**द्वितीयः** - भोस्तात ! अभिवादये।

**वृद्धः** - एह्येहि पुत्र !

**विनिमाय गुरुप्राणान् स्वैःप्राणैर्गुरुवत्सल।**
**अकृतात्मदुरावापं ब्रह्मलोकमवाप्नुहि॥ (२१)**

**द्वितीयः** - अनुगृहीतोऽस्मि।
अम्ब! अभिवादये।

**ब्राह्मणी** - जात! चिरं जीव।

**द्वितीयः** - अनुगृहीतोऽस्मि।
आर्य! अभिवादये।

**प्रथमः** - एह्येहि वत्स !

**परिष्वजस्व गाढं मां परिष्वक्तः शुभैर्गुणैः।**
**कीर्त्या तव परिष्वक्ता भविष्यति वसुन्धरा॥ (२२)**

**द्वितीयः** - अनुगृहीतोऽस्मि।

**तृतीयः** - आर्य ! अभिवादये।

**द्वितीयः** - स्वस्ति।

**तृतीयः** - अनुगृहीतोऽस्मि।

**द्वितीयः** - भोः पुरुष ! किञ्चिद् ब्रवीमि।

**घटोत्कचः** - ब्रूहि ब्रूहि शीघ्रम्।

**द्वितीयः** - एतस्मिन् वनान्तरे जलाशय इव दृश्यते।
तत्र मे प्रकल्पितपरलोकस्य पिपासाप्रतीकारं करिष्यामि।

**घटोत्कचः** - दृढव्यवसायिन् !
गम्यताम्।
अतिक्रामति मातुराहारकालः।
शीघ्रमागच्छ।

**द्वितीयः** - भोस्तात! एष गच्छामि। (निष्क्रान्तः)।

### पदच्छेदः।

| | | |
|---|---|---|
| कश्चिन्मानुषः | - | कश्चित् + मानुषः। |
| स्त्रीजनोऽभिमतस्तत्रभवत्याः | - | स्त्रीजनः + अभिमतः+ तत्रभवत्याः। |
| द्विपुत्रो मोक्षमिच्छसि | - | द्विपुत्रः+मोक्षम्+ इच्छसि। |
| पुत्रमेकम् | - | पुत्रम् + एकम्। |
| भोस्तात | - | भोः + तात। |
| प्राणैर्गुरुप्राणान् | - | प्राणैः + गुरुप्राणान्। |
| ततोऽहमेव | - | ततः + अहम् + एव। |
| वृद्धस्त्वमपसर | - | वृद्धः + त्वम् + अपसर। |
| प्रीतोऽस्मि | - | प्रीतः + अस्मि। |
| अनुगृहीतोऽस्मि | - | अनुगृहीतः + अस्मि। |
| प्राणैर्गुरुवत्सल | - | प्राणैः + गुरुवत्सल। |
| शीघ्रमागच्छ | - | शीघ्रम् + आगच्छ। |
| कर्तुमस्म्यर्हो गुरूणाम् | - | कर्तुम् + अस्मि + अर्हः + गुरूणाम्। |
| बन्धुस्नेहाद्धि | - | बन्धुस्नेहात् + हि। |
| कायस्नेहस्तु | - | कायस्नेहः + तु। |
| एह्येहि | - | एहि + एहि। |
| शुभैर्गुणैः | - | शुभैः + गुणैः। |

### विग्रहः।

| | | |
|---|---|---|
| द्विपुत्रः | - | द्वौ पुत्रौ यस्य सः। |
| सकुटुम्बम् | - | कुटुम्बेन सह। |
| कृतकृत्यम् | - | कृतं कृत्यं येन तम्। |
| सुतापेक्षी | - | सुतम् अपेक्षितुं शीलं यस्य सः। |
| राक्षसाग्निः | - | राक्षस एव अग्निः। |
| शीलगुणान्वितः | - | शीलगुणैः अन्वितः। |
| पुरुषादः | - | पुरुषान् अत्ति इति। |
| गुरुप्राणाः | - | गुरूणां प्राणाः। |
| गुरुवृत्तिम् | - | गुरोः वृत्तिः गुरुवृत्तिः, ताम्। |
| प्राणरक्षणम् | - | प्राणानां रक्षणम्। |
| बन्धुस्नेहः | - | बन्धुषु स्नेहः। |
| कायस्नेहः | - | काये स्नेहः। |

अन्वयः

१२) **पत्न्या चारित्रशालिन्या .....**

**अन्वयः।**

(यदि) चारित्र्यशालिन्या पत्न्या (सह) द्विपुत्रः (त्वं मत्तः) मोक्षमिच्छसि (तर्हि) बलाबलं परिज्ञाय एकं पुत्रं विसर्जय।

**आशयः।**

हे ब्राह्मण! त्वं पतिव्रतया भार्यया द्वाभ्यां पुत्राभ्यां च सह मोचनं यदि इच्छसि तर्हि पुत्राणां शक्तिदौर्बल्यं विज्ञाय एकं पुत्रं देहि।

१३) **ब्राह्मणः श्रुतवान् .....**

**अन्वयः।**

अहं वृद्धः श्रुतवान् ब्राह्मणः। अतः शीलगुणान्वितं पुत्रं पुरुषादस्य दत्वा कथं निर्वृतिम् आप्नुयाम्।

**आशयः।**

(हे दुष्ट! राक्षस!) ब्रह्मज्ञानी ब्राह्मणः अहं शीलगुणयुक्तं मम पुत्रं मनुष्यभक्षकाय राक्षसाय दत्वा कथं सुखजीवनं प्राप्नोमि।

१४) **यद्यर्थितो द्विजश्रेष्ठ....**

**अन्वयः।**

हे द्विजश्रेष्ठ! यदि अर्थितः (सन्) एकं पुत्रं न मुञ्चसि (तर्हि) क्षणेन एव सकुटुंम्बं विनाशम् उपयास्यसि।

**आशयः।**

हे ब्राह्मणश्रेष्ठ! मया याचितः अपि एकं पुत्रं त्वं यदि न दास्यसि तर्हि सकुटुम्बं झटित्येव विनाशं गमिष्यसि।

१५) **कृतकृत्यं शरीरं मे .....**

**अन्वयः।**

सुतापेक्षी परिणामेन जर्जरं विधिसंस्कृतं कृतकृत्यं मे शरीरं राक्षसाग्नौ होष्यामि।

**आशयः।**

पुत्राणां कृते यत्करणीयं तत्सर्वं कृत्वा वार्धक्येन क्षीणितं यथाविधि कर्मानुष्ठानेन संशुद्धं च मे शरीरं राक्षसाय तुभ्यम् अहं दास्यामि।

**अलङ्कारः - काव्यलिङ्गम्।**

अत्र वृद्धब्राह्मणः जरापरिणतं विधिसंस्कृतं च स्वशरीरं घटोत्कचस्य मातुः कृते समर्पयितुं सन्नद्धो भवति। स्वप्राणपरित्यागरूपस्य समर्थनीयस्य अर्थस्य सुतापेक्षी (अहम्) इति समर्थनात् काव्यलिङ्गं नाम अलङ्कारः।

## १६) मम प्राणैर्गुरुप्राणान्.....

**अन्वयः ।**

अहं मम प्राणैः गुरुप्राणान् परिरक्षितुं इच्छामि । अतः भवान् अस्य कुलस्य रक्षणार्थं मां मोक्तुं अर्हति ।

**आशयः ।**

मम जीवत्यागेन मातापित्रोः जीवरक्षणं कर्तुम् अहम् इच्छामि । अस्य कुलस्य रक्षणाय (भवता अहम् उपेक्षणीयः) भवान् मां त्यजतु । अत्र काव्यलिङ्गालङ्कारः।

## १७) ज्येष्ठः श्रेष्ठः कुले लोके .....

**अन्वयः ।**

कुले लोके ज्येष्ठः श्रेष्ठः पितॄणां सुसम्प्रियः च । ततः गुरुवृत्तिम् अनुस्मरन् अहमेव यास्यामि ।

**आशयः ।**

ज्येष्ठः कुले लोके च श्रेष्ठः पितॄणां प्रियतमः च । अतः ज्येष्ठः सजीवोऽत्र स्यात् । अहमेव राक्षसम् अनुगमिष्यामि । अत्र काव्यलिङ्गालङ्कारः।

## १८) ज्येष्ठो भ्राता पितृसमः .....

**अन्वयः ।**

ज्येष्ठः भ्राता पितृसमः इति ब्रह्मवादिभिः कथितः। ततः गुरूणां प्राणरक्षणं कर्तुम् अहं अर्हः अस्मि ।

**आशयः ।**

ज्येष्ठभ्राता पितृतुल्यः इत्येव ब्रह्मवादिभिः उक्तः। अतः गुरूणां प्राणरक्षणं मम कर्तव्यं भवति । (मया करणीयमस्ति ।)

## १९) आपदं हि पिता प्राप्तो.....

**अन्वयः।**

हि पिता आपदं प्राप्तः ज्येष्ठपुत्रेण तार्यते । ततः अहमेव गुरूणां प्राणरक्षणात् यास्यामि ।

**आशयः।**

आपदि पतितस्य पितुः रक्षणं ज्येष्ठपुत्रस्य कर्तव्यं भवति । अतः गुरूणां प्राणरक्षणहेतवे अहमेव यास्यामि ।

## २०) धन्योऽस्मि यद् गुरुप्राणाः....

**अन्वयः।**

धन्यः अस्मि । यत् स्वैः प्राणैः गुरुप्राणाः परिरक्षिताः। हि महतः बन्धुस्नेहात् कायस्नेहः दुर्लभः।

**आशयः।**

मम प्राणैः गुरुप्राणाः रक्षिताः। अतः अहं धन्यः अस्मि। यतः बन्धुस्नेहापेक्षया कायस्नेहः निस्सारः (अत्यल्पः) एव। अत्र काव्यलिङ्गालङ्कारः।

२१) **विनिमाय गुरुप्राणान् ......**

**अन्वयः।**

गुरुवत्सल! स्वैः प्राणैः गुरुप्राणान् विनिमाय अकृतात्मदुरावापं ब्रह्मलोकं अवाप्नुहि।

**आशयः।**

हे गुरुवत्सल! त्वं स्वीयैः प्राणैः गुरुप्राणान् प्रतिस्वीकृत्य अपुण्यात्मभिः प्राप्तुं दुष्करं ब्रह्मलोकम् अवाप्नुहि।

२२) **परिष्वजस्व गाढं मां .......**

**अन्वयः।**

हे वत्स! शुभैः गुणैः परिष्वक्तः (त्वं) मां गाढं परिष्वजस्व। इयं वसुन्धरा तव कीर्त्या परिष्वक्ता भविष्यति।

**आशयः।**

मङ्गलमयगुणैः पावितः भवान् ज्येष्ठं मां गाढम् आलिङ्गतु। तव कीर्त्या एषा भूमिः अभिव्याप्ता भविष्यति।

## व्याकरणकार्यम्।

### तृतीया विभक्तिः।

**भासेन नाटकानि रचितानि।**

**स्वतन्त्रः कर्ता। (१-४-५४)**

**क्रियायां स्वातन्त्र्येण विवक्षितोऽर्थः कर्ता स्यात्।**

**टिप्पणिः** - स्वातन्त्र्यम् - प्राधान्यम्। धात्वर्थव्यापाराश्रयत्वम्। फलानुकूलव्यापारो धात्वर्थः। क्रियाश्रयः कर्ता इति फलितोऽर्थः। कर्मादीनामपि स्वातन्त्र्यविवक्षायां कर्तृत्वम्। यथा खड्गः छिनत्ति। स्थाली पचति। घटः पश्यति।

**घटोत्कचः हस्तेन भीमं ताडयति।**

**साधकतमं करणम्। (१-४-४२)**

**क्रियासिद्धौ प्रकृष्टोपकारकं कारकं करणसंज्ञं स्यात्।**

**टिप्पणिः -** क्रियासिद्धिः क्रियोत्पत्तिः। अतिशयितं साधकं साधकतमम्। यद्व्यापारानन्तरं क्रियानिष्पत्तिः तत् प्रकृष्टम्।

उदा- रामः बाणेन रावणं हन्ति । अत्र रामः कर्ता । प्राणवियोगरूपफलाश्रयत्वात् रावणः कर्म । प्राणवियोगरूपं फलं बाणप्रवेशानन्तरमेव भवतीति बाणः करणम् ।

**घटोत्कचेन मायापाशेन बन्धितः भीमः।**

**कर्तृकरणयोः तृतीया । (२-३-१८)**

**अनभिहिते कर्तरि करणे च तृतीया स्यात् । रामेण बाणेन हतो बाली।**

रामकर्तृकबाणकरणकहिंसाक्रियाविषयो बाली इत्यर्थः ।

देवदत्तेन परशुना वृक्षः छिद्यते ।

बालेन पादाभ्यां गृहं गम्यते ।

**नाम्ना भीमसेनः । नाम्ना घटोत्कचः।**

**प्रकृत्यादिभ्य उपसंख्यानम् । (वार्तिकम्)**

प्रकृत्या चारुः । प्रायेण याज्ञिकः। गोत्रेण गार्ग्यः। समेन एति। विषमेण एति । द्विद्रोणेन धान्यं क्रीणाति । पञ्चकेन पशून् गृह्णाति। सुखेन दुःखेन वा याति। नाम्ना देवदत्तः । नाम्ना चन्द्रशेखरः। नाम्ना सुदक्षिणा (रघुवंशः) ।

**छात्राः संस्कृताध्यापकेन साकं नाटकं द्रष्टुं गच्छन्ति।**

**सहयुक्तेऽप्रधाने । (२-३-१९)**

**सहार्थेन युक्तेऽप्रधाने तृतीया स्यात् । सहार्थेन इति कथनात् साकं, सार्धं, समम् इति पर्यायाणां योगेऽपि तृतीया स्यात् ।**

'**पुत्रेण** सहागतः पिता । अस्मिन् वाक्ये पिता कर्ता, पुत्रः अपि । किन्तु पिता प्रधानं, पुत्रः अप्रधानम् ।

बालः **मित्रेण** सह आगच्छति ।

अध्यापकः **शिष्येण** सह आगच्छति ।

**वने भाग्येन दृष्टो भीमसेनः।**

**हेतौ । (२-३-२३)**

**हेत्वर्थे तृतीया स्यात् । दण्डेन** घटः । **पुण्येन** दृष्टो हरिः। फलमपीह हेतुः। **अध्ययनेन** वसति। अत्र वासस्य अध्ययनं फलरूपं कारणम् । अतः हेतुभूतात् अध्ययनात् तृतीया अनेन सूत्रेण ।

**अलं गमनेन।**

**गम्यमानापि क्रिया कारकविभक्तौ प्रयोजिका । - (वार्तिकम् ।)**

अलं श्रमेण । श्रमेण साध्यं नास्ति इत्यर्थः । इह गम्यमानां साधनक्रियां प्रति श्रमः करणम् ।

अलं विस्तरेण - विस्तरेण बोध्यं किमपि नास्ति इत्यर्थः । अलं भोजनेन, अलं भयेनात्मयोने (श्रीरामोदन्तः) ।

**कर्णेन बधिरः।**

**येनाङ्गविकारः। (२ - ३ - २०)**

**येनाङ्गेन विकृतेनाङ्गिनो विकारो लक्ष्यते ततः तृतीया स्यात् ।**

अक्ष्णा काणः। अक्षिसम्बन्धिकाणत्वविशिष्टः इत्यर्थः। काणः रात्र्यन्धः। पादेन खञ्जः।

## चतुर्थी विभक्तिः

**ब्राह्मणकुमारः भीमसेनाय जलं ददाति ।**

**कर्मणा यमभिप्रैति सः सम्प्रदानम् । (१- ४- ३२)**

**दानस्य कर्मणा यमभिप्रैति सः सम्प्रदानसंज्ञः स्यात् ।**

**टिप्पणिः**

सम्प्रदीयते अस्मै इति सम्प्रदानम् ।

**मम शरीरं राक्षसाय तुभ्यम् अहं दास्यामि ।**

**चतुर्थी सम्प्रदाने । (२ - ३ - १३)**

**सम्प्रदानवाचकात् शब्दात् चतुर्थी विभक्तिः भवति ।**

**दरिद्राय** धनं ददाति । अत्र दरिद्रमुद्दिश्य धनं ददाति इत्यर्थः। दानस्य कर्मणा धनेन दरिद्रः उद्दिश्यते । गुरुः **शिष्याय** विद्यां ददाति । पिता **पुत्राय** फलं ददाति ।

**गुरवे नमः। पित्रे नमः । मात्रे नमः ।**

**नमः स्वस्तिस्वाहास्वधालंवषड्योगाच्च । (२ - ३ - १६)**

**एभिः योगे चतुर्थी स्यात्** । **हरये** नमः। **विष्णवे** नमः। **प्रजाभ्यः** स्वस्ति । **अग्नये** स्वाहा । **पितृभ्यः** स्वधा । अलमिति पर्याप्त्यर्थग्रहणम् । तेन दैत्येभ्यो हरिरलं प्रभुः समर्थः शक्तः इत्यादि । उदाः - तस्यालमेषा क्षुधितस्य तृप्त्यै । (रघुवंशम् ।)

परितोषाय मेऽङ्गानि न प्रभवन्ति । (कुमारसम्भवम् ।)

**ब्राह्मणमध्यमाय ज्येष्ठस्य प्राणरक्षणं रोचते ।**

**रुच्यर्थानां प्रीयमाणः । (१- ४ - ३३)**

**रुच्यर्थानां धातूनां प्रयोगे प्रीयमाणोऽर्थः सम्प्रदानं स्यात् । हरये रोचते भक्तिः । बालकाय गुडः रोचते । शिशवे मधुरं रोचते ।**

**टिप्पणिः -**

प्रीयमाणः समवायेन प्रीत्याश्रयः। 'रुच्' दीप्तावभिप्रीतौ च। प्रीतिरिह रुच्यर्थः। तथा च प्रीतिजनकार्थानाम् इत्यर्थः।

**ब्राह्मणी घटोत्कचाय क्रुध्यति।**

**क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः। (१- ४ - ३७)**

**क्रुधाद्यर्थानां योगे यं प्रति कोपः सः उक्तसंज्ञः स्यात्।**

क्रुध्यति, द्रुह्यति, ईर्ष्यति, असूयति इत्येतेषां तत्पर्यायाणाञ्च प्रयोगे यं प्रति कोपः सः सम्प्रदानसंज्ञां प्राप्नोति इत्यर्थः।

हरये क्रुध्यति, द्रुह्यति, ईर्ष्यति, असूयति वा।

कंसः कृष्णाय क्रुध्यति।

कर्णः अर्जुनाय ईर्ष्यति।

अत्र अर्जुनं प्रति कर्णस्य कोपः। अतः अर्जुनः सम्प्रदानम्।

**टिप्पणिः-**

क्रोधोऽमर्षः। द्रोहोऽपकारः। ईर्ष्या अक्षमा (असहनम्)।

असूया गुणेषु दोषाविष्करणम्।

**मध्यमः जलाय याति।**

**क्रियार्थोपपदस्य च कर्मणि स्थानिनः। (२ - ३ - १४)**

**क्रियार्था क्रिया उपपदं यस्य तस्य स्थानिनो अप्रयुज्यमानस्य तुमुनः कर्मणि चतुर्थी स्यात्। फलेभ्यो याति। फलान्याहर्तुं याति।**

'यशोधनो धेनुमृषेर्मुमोच वनाय'। अत्र नेतुम् इति तुमुनः अप्रयोगे वनायेति चतुर्थी। 'कुलं च नः सत्यधनं ब्रवीमि ते'। तुभ्यं कथयामि - त्वां बोधयितुं कथयामि इत्यर्थः।

(प्रतिमानाटकम् - रामभरतसमागमः।)

## पठनप्रवर्तनानि।

**पाठभागे विद्यमानस्य व्यायोगस्य अभिनयं कृत्वा वीडियो निर्माय कक्ष्यायां प्रदर्शयतु।**

श्रद्धेयाः अंशाः –

- व्यायोगाभिनयस्य वेदिकासज्जीकरणमधिकृत्य चर्चा व्यायोगस्य अभ्यासः च।
- कक्ष्यायां दृश्याविष्करणम्।
- KITE Club इत्यस्य साहाय्येन वीडियोमुद्रणम्।
- वीडियोप्रदर्शनम् आस्वादनं च।

**मध्यमस्य दीनतायाः परिहारः कथम् अभवत् इति अनुबन्धे दत्तं कथाभागं पठित्वा अवधारयतु। इतरभाषानाटकैः सह तुलनं कृत्वा टिप्पणिं च लिखतु।**

श्रद्धेयाः अंशाः -

- ❖ पाठभागस्य कथासंग्रहस्य च पठनम्। ❖ सङ्घे चर्चा अवधारणं च।
- ❖ इतरभाषानाटकैः सह तुलनं कृत्वा टिप्पणीलेखनम् अवतारणं च।

**पाठभागं कथासंग्रहं च चर्चित्वा अधोनिर्दिष्टानां कथापात्राणां स्वभावं निरूपयतु। उपन्यासं च लिखतु।**

(क) घटोत्कचः। (ख) वृद्धब्राह्मणः। (ग) द्वितीयः ब्राह्मणपुत्रः।

श्रद्धेयाः अंशाः –

- ❖ निर्दिष्टभागस्य वाचनम्। ❖ कथापात्राणां स्वभावमधिकृत्य चर्चा।
- ❖ आशयस्वांशीकरणम्। ❖ लघूपन्यासलेखनम्।

**अनुबन्धं (१-क,ख) पठित्वा " मध्यमव्यायोगः" लक्षणानुसारी वा इति विषयमधिकृत्य कक्ष्यायां संवादं प्रचालयतु। टिप्पणिं च लिखतु।**

श्रद्धेयाः अंशाः –

- ❖ निर्दिष्टांशस्य पठनम्। ❖ आवश्यकानां दत्तानां समाहरणं विशकलनं च।
- ❖ संवादः टिप्पणीलेखनं च।

**अनुबन्धं (३ - क) पठित्वा डा. टि. गणपतिशास्त्री महोदयस्य योगदानमधिकृत्य लघूपन्यासं रचयतु।**

श्रद्धेयाः अंशाः –

- ❖ निर्दिष्टांशस्य पठनम्। ❖ चर्चा आशयस्वांशीकरणं च।
- ❖ टिप्पणीलेखनम्।

**भासनाटकानां स्रोतोग्रन्थाः के इति अनुबन्धं (३ - ख) पठित्वा निर्धारयतु। स्रोतोग्रन्थानुसारं पट्टिकां च रचयतु।**

श्रद्धेयौ अंशौ –

- ❖ निर्दिष्टांशस्य पठनम् अवधारणं च। ❖ पट्टिकारचना।

**कक्ष्यायां चर्चित्वा अधोरेखाङ्कितानां विभक्तीनां प्रयोगसाधुतां सप्रमाणं निर्णयतु। लिखित्वा अवतारयतु।**

१. भासेन नाटकानि रचितानि। २. रामः बाणेन रावणं हन्ति।

३. रामेण बाणेन हतो बाली। ४. नाम्ना सुदक्षिणा।

५. सतीशः मित्रेण सह ग्रन्थालयम् अगच्छत्। ६. पुण्येन दृष्टो हरिः।
७. अलं विस्तरेण। ८. कर्णेन बधिरः।
९. माता पुत्राय अन्नं ददाति। १०. गुरुः शिष्याय विद्यां ददाति।
११. गुरवे नमः। १२. गणेशाय मोदकं रोचते।
१३. कर्णः अर्जुनाय ईर्ष्यति। १४. माता फलेभ्यो याति।

श्रद्धेयाः अंशाः -

- ❖ व्याकरणकार्यस्य पठनम्। ❖ सङ्घे स्थित्वा चर्चा।
- ❖ प्रयोगसाधुताः निर्णीय लिखित्वा अवतारणम्।

## अभ्यासपत्रिका।

### क. तृतीयाविभक्तिम् उपयुज्य वाक्यं पूरयतु।

१. अनिलः - - - पङ्गुः। (पादः)
२. पुत्रः ------ सह विद्यालयं गच्छति। (माता)
३. गीता बालिकावासस्थले -------- वसति। (अध्ययनम्)
४. अयं बालकः ------- अशोकः। (नाम)
५. बालकेन -------- गृहं गम्यते। (पादः)

श्रद्धेयाः अंशाः -

- ❖ वैयक्तिकप्रवर्तनम्। ❖ तृतीयाविभक्तिज्ञानम्।
- ❖ आशयरूपीकरणम्। ❖ वाक्यपूरणम्।

### ख. चतुर्थीविभक्तिम् उपयुज्य पूरयतु।

१. माता ------ अन्नं ददाति। (पुत्रः) २. याचकः ------ क्रुध्यति (पथिकः)
३. ------ सङ्गीतं रोचते। (ललिता) ४. माता -------- याति। (फलम्)
५. ------ स्वाहा। (इन्द्र:)

श्रद्धेयाः अंशाः -

- ❖ वैयक्तिकप्रवर्तनम्।
- ❖ चतुर्थीविभक्तिसम्बन्धि सूत्रज्ञानम्।
- ❖ वाक्यपूरणम्।

## अनुबन्धः ।

### १. (क). मध्यमव्यायोगः।

त्रयोदशग्रन्थात्मके भासनाटकचक्रनाम्ना प्रथिते दृश्यकाव्यप्रपञ्चे अन्यतमो भवति मध्यमव्यायोगः । सूत्रधारकृतारम्भे अस्मिन् व्यायोगे सूत्रधाराद् ऋते अष्ट कथापात्राणि सन्ति । अष्टसु च द्वे स्त्रियौ । सर्वथा व्यायोगलक्षणानुसारं विरचितोऽयं व्यायोगः। क्रिस्तोः पूर्वं चतुर्थे शतके भासः स्वस्य रूपकाणि संरचितवान् इति प्रबल: पक्षः। क्रिस्तोः पूर्वं जन्म प्राप्तवता कालिदासेन रचिते मालविकाग्निमित्रं नाम नाटके प्रस्तावनायां भासमधिकृत्य प्रतिपाद्यते । सप्तमे शतके जीवनं कृतवता बाणभट्टेन अपि भासः स्तूयते । टि. गणपतिशास्त्रिवर्येण 1912 - 15 वर्षयोर्मध्ये मणलिक्करभवनात् भासस्य त्रयोदशरूपकाणि तालग्रन्थेभ्यः स्वीकृत्य प्रकाशितानि। "**नाटकान्तं कवित्वम्**" इति प्रथां स्वीयरूपकरचनाकौशलेन साक्षात्कृतवान् असौ महाकविः इति निस्तर्कम् ।

ब्राह्मणपुत्रेषु मध्यमस्य स्वकुटुम्बेन सह विशेषेण आयोगः, तथा पाण्डवमध्यमस्य भीमसेनस्य स्वकुटुम्बेन सह विशेषेण आयोगः समजनि इति मध्यमव्यायोगः इति शीर्षकमपि सुसङ्गतं भवति ।

### (ख). व्यायोगलक्षणम् ।

ख्यातेतिवृत्तो व्यायोगः स्वल्पस्त्रीजनसंयुतः।
हीनो गर्भविमर्शाभ्यां नरैर्बहुभिराश्रितः॥
एकाङ्कश्च भवेदस्त्रीनिमित्तसमरोदयः।
कैशिकीवृत्तिरहितः प्रख्यातस्तत्र नायकः॥
राजर्षिरथ दिव्यो वा भवेद्धीरोद्धतश्च सः।
हास्यशृङ्गारशान्तेभ्यः इतरेऽत्राङ्गिनो रसाः॥

(साहित्यदर्पणम् - ६-२३१-२३३)

വ്യായോഗത്തിൽ ഇതിവൃത്തം പ്രസിദ്ധമായിരിക്കും. സ്ത്രീകഥാപാത്രങ്ങൾ കുറവായിരിക്കും. ഗർഭസന്ധിയും വിമർശസന്ധിയും ഇതിൽ ഉണ്ടാകില്ല. ഒരങ്കം മാത്രമുള്ള ഇതിൽ സ്ത്രീ കാരണമല്ലാതെ യുദ്ധം ഉണ്ടായിരിക്കും. കൈശികീവൃത്തി ഉണ്ടാകില്ല. നായകൻ പ്രസിദ്ധനും ധീരോദ്ധതനുമായ ദിവ്യനോ രാജർഷിയോ ആകാം. ശൃംഗാരം, ഹാസ്യം, ശാന്തം എന്നീ രസങ്ങൾ അംഗിയായി വരരുത്. വീരമോ രൗദ്രമോ ആണ് മുഖ്യരസമായി കാണുന്നത്.

## 2. मध्यमव्यायोगस्य कथासङ्ग्रहः।

केशवदासो नाम ब्राह्मणः भार्यया पुत्रैश्च साकं हिडिम्ब वनमार्गेण सञ्चरन्नासीत् । तदा व्रतावसाने मात्रे भोक्तुं कञ्चन मानुषम् अन्विष्यता घटोत्कचेन ते निरुद्धाः। भीकररूपिणं घटोत्कचं दृष्ट्वा ते सर्वेऽपि भयचकिताः अभवन् । भीत्या तेषु एकैकोऽपि घटोत्कचस्य भयानकं रूपम् अधिकृत्य वदति स्म । तदा घटोत्कचः एवं अवदत्- यत् "मम मात्रा हिडिम्बया प्रेषितोऽहम् । मम मातुः कृते आहारार्थं कञ्चित् मानुषम् अन्विष्य आगतोऽस्मि । " भवत्सु एकः मया साकम् आगच्छतु । नो चेत् सकुटुम्बं सर्वान् मारयिष्यामि " इति । तदा वृद्धब्राह्मणः प्रथमम् आत्मत्यागाय सन्नद्धः भवति । तदा " वृद्धस्त्वम् अपसर " इत्युक्त्वा घटोत्कचः तं न्यवारयत् । स्त्री इति कारणेन ब्राह्मणीम् अपि । पुत्रेषु एकः दीयतामित्यवदत् । तदा पिता ज्येष्ठपुत्रे स्निह्यति इति कारणेन तं, माता इष्टतमं कनिष्ठपुत्रं च दातुं न ऐच्छताम् । अन्ते " पित्रोरनिष्टः अहं कस्यापि प्रियो नास्मि" इति जानन् मध्यमः " अहमेव यास्यामि" इत्युक्त्वा घटोत्कचेन साकं गन्तुं सन्नद्धः अभवत् । "समीपस्थे जलाशये जलपानं कर्तुम् इच्छामि' इति सः घटोत्कचम् अवदत् । घटोत्कचस्य अनुमत्या अगच्छत् च । मध्यमः चिरायते इत्यतः घटोत्कचः उच्चैः एवम् आह्वयत् "भो ! मध्यम! अतिक्रामति मातुराहारकालः, शीघ्रमागच्छ " इति ।"मध्यम !, मध्यम !" इति आह्वानं श्रुत्वा पाण्डवमध्यमः भीमः एव आगच्छत् । "ब्राह्मणपुत्रं त्यक्त्वा मां बद्ध्वा बलात्कारेण नयतु " इति भीमेन उक्तवति सति तयोर्मिथः युद्धं प्रवृत्तम् । अन्ते भीमं विजित्य तं घटोत्कचः हिडिम्बायाः समीपम् अनयत् । तदा भीमसेनं दृष्ट्वा हिडिम्बा पुत्रमवदत् - "उन्मत्त! अभिवादय स्वपितरम्" इति । पिता इति अज्ञात्वा कृतस्य पापस्य कृते घटोत्कचः क्षमाम् अयाचत । मातापितृभ्यां साकं घटोत्कचस्य समागमानन्तरं सर्वे मिलित्वा ससन्तोषं ब्राह्मणपरिवाराय यात्रामङ्गलम् अदुः।



## ३. (क) डा. टि. गणपतिशास्त्री ।



हस्तलिखितग्रन्थानां संशोधने प्रसिद्धः संस्कृतपण्डितः भवति डा. तरुवाय् गणपतिशास्त्रिवर्यः। 1860 तमे वर्षे तमिल् नाटु राज्ये तिरुनेल् वेलि जिल्लायां ' तरुवाय् ' ग्रामे जनिम् अलभत । षोडशे वयसि तमिल्नाटु राज्यात् केरलम् आगतोऽयं महानुभावः तिरुवनन्तपुरसमीपस्थे करमनग्रामे उषित्वा तस्य पठनपाठनकार्याणि निरवहत् । महाराजः श्री विशाखंतिरुनाल् तिरुवितांकूर् राजभवनस्य संस्कृतग्रन्थालयस्य निर्वाहकत्वं तस्मै अदात् । सः 1899 तमे वर्षे तिरुवनन्तपुरे केरलसंस्कृतमहाविद्यालयस्य प्रांशुपालः अभवत् । तस्य प्रतिभां विज्ञाय तिरुवितांकूर् सर्वकारेण 1908 तमे वर्षे संस्कृतहस्तलिखितग्रन्थानां संशोधनकार्याणाम् अध्यक्षरूपेण सः नियुक्तः। 1912 -15 वर्षयोर्मध्ये कन्याकुमारीजिल्लायाः मणलिक्करभवनात् अनेन भासमहाकवेः त्रयोदशरूपकाणि ताडग्रन्थेभ्यः समाहृत्य संशोधनं कृत्वा प्रसिद्धीकृतानि । 1926 तमे वर्षे संस्कृतोपासकोऽयं दिवंगतः।

## (ख). भासस्य त्रयोदशरूपकाणि ।

| | |
|---|---|
| १. प्रतिज्ञायौगन्धरायणम् ।<br>२. अविमारकम् ।<br>३. स्वप्नवासवदत्तम् । | बृहत्कथा । |
| ४. प्रतिमानाटकम् ।<br>५. अभिषेकनाटकम् । | रामायणम् । |
| ६. मध्यमव्यायोगः।<br>७. पञ्चरात्रम् ।<br>८. दूतघटोत्कचम् ।<br>९. कर्णभारम् ।<br>१०.दूतवाक्यम् ।<br>११.ऊरुभङ्गम् । | महाभारतम् । |
| १२.बालचरितम् । | भागवतम् । |
| १३.चारुदत्तम् । | कल्पितकथाश्रितम् । |

## शब्दकोशः ।

| संस्कृतम् | अर्थः | कैरली | आङ्गलम् |
|---|---|---|---|
| कथाबीजम् | कथामूलम् | കഥാബീജം | Main thread of the story |
| पुरुषादः | मनुष्यखादकः | നരഭോജി | A man-eater |
| जर्जरम् | जीर्णितम् | ജീർണിച്ചത് | Decayed |
| होष्यामि | हवनं करिष्यामि | ഞാൻ ഹോമിക്കും | I will offer (as sacrifice) |
| अभिमतः | इष्टः | ഇഷ്ടപ്പെട്ടത് | Favoured |
| यास्यामि | गमिष्यामि | ഞാൻ പോകാം | I will go |
| आपदम् | दुःस्थितिम् | ആപത്ത് | Danger |
| तार्यते | रक्ष्यते | രക്ഷിക്കപ്പെടുന്നു | Been saved |
| कायस्नेहः | शरीरस्नेहः | ശരീരസ്നേഹം | Affection to Physique |
| दुरावापम् | दुःखेन अवाप्तुं योग्यम् | കഷ്ടസാധ്യം | Unattainable |
| परिष्वजस्व | आलिङ्गनं कुरु | ആലിംഗനം ചെയ്താലും | You embrace |
| वसुन्धरा | भूमिः | ഭൂമി | The Earth |
| पिपासा | पातुम् इच्छा | ദാഹം | Thirst |

## किमधिगतम् ।

| पठनप्रवर्त्तनानि । | स्वांशीकृतम् । | भागिकतया स्वांशीकृतम् । | प्रगतये प्रयत्नः करणीयः। |
|---|---|---|---|
| वीडियोनिर्माणं कृतम् । | | | |
| कथां संगृह्य टिप्पणी लिखिता । | | | |
| स्वभावनिरूपणं कृतम् । | | | |
| व्यायोगः लक्षणानुसारीति चर्चां कृत्वा टिप्पणी लिखिता । | | | |
| गणपतिशास्त्रिणमधिकृत्य लघूपन्यासः रचितः । | | | |
| पट्टिका रचिता । | | | |
| विभक्तीनां प्रयोगसाधुतां सप्रमाणं निर्णीय अवतारणं कृतम् । | | | |
| अभ्यासपत्रिका कृता । (क, ख) | | | |

**आगामिनि पाठे नवीनपद्यसाहित्यं परिचिनुमः।**

चतुर्थः पाठः

# काव्यमञ्जरी ।

**प्रवेशकः।**

अध्यापकः नूतनचलच्चित्रगानानां संस्कृताविष्कारं श्रावयति। केरलीयकविभिः रचितैः संस्कृतकाव्यैः एवम् अनूदितैः काव्यैः च सम्पुष्टा भवति संस्कृतभाषा। अस्मिन् पाठे अनूदितकाव्यात् स्वतन्त्रकाव्यात् च समाकलिताः पञ्च श्लोकाः समायोजिताः।





## आमुखम् ।

केरलेषु प्रसिद्धाः प्राचीनसंस्कृतकवयः भाससुकुमारकविप्रभृतयः आसन् । नवीनकाले प्रसिद्धेषु कविषु केचन एन्. गोपालपिल्ला, के. वासुदेवगणकः, डा. पि.के. नारायणपिल्ला, कोट्टयत्तु तम्पुरान्, मेल्पुत्तूर् नारायणभट्टतिरिः च । एतेषां परिचयः अनुबन्धे दत्तः भवति । अस्मिन् काव्यविभागे पूर्वोक्तानां कवीनां काव्येभ्यः उद्धृताः पञ्च श्लोकाः समाकलिताः।

## १. सीताविचारलहरी ।

महाकवेः एन्. कुमारनाशान् महोदयस्य 'चिन्ताविष्टयाय सीता' इति काव्यस्य संस्कृतानुवादः भवति सीताविचारलहरी । काव्यस्यास्य कर्ता भवति प्रसिद्धपण्डितः एन्. गोपालपिल्ला महोदयः। श्रीरामाभिषेकानन्तरम् अश्वमेधावसरे रामस्य समीपं वाल्मीकिना सह लवकुशौ संप्रेष्य आश्रमवाटिकायाम् उपविष्टायाः सीतायाः गतकालस्मृतयः एव काव्यस्यास्य विषयः। मूलपद्यस्य पठनाय अनुबन्धं पश्यतु (पु.सं. ७२) ।

**तम एव चिराय संस्तुतं**
**प्रतिपद्येत शनैः प्रकाशताम् ।**
**सुतरां मधुरायते स्वयं**
**स च तिक्तः परिशीलितो रस : ॥**

(श्लोकसंख्या -३१)

**पदार्थः।**

| | | |
|---|---|---|
| चिराय | - | चिरकालात् |
| संस्तुतम् | - | परिचितम् |
| तमः एव | - | अन्धकारः एव |
| शनैः | - | मन्दं मन्दं (क्रमेण) |
| प्रकाशतां | - | प्रकाशरूपतां |
| प्रतिपद्येत | - | प्राप्येत |
| स्वयं | - | स्वतः |
| परिशीलितः | - | पुनःपुनरनुभूतः |



| | | |
|---|---|---|
| सः तिक्तः रसः च- | | तिक्तरसः एव ('कय्प्' रसम् इति भाषायाम्) |
| सुतरां | - | नितरां |
| मधुरायते | - | मधुरतुल्यः भवति। |

**विग्रहः।**

| | | |
|---|---|---|
| प्रकाशताम् | - | प्रकाशस्य भावः प्रकाशता। ताम्। |
| मधुरायते | - | मधुरम् इव आचरति। |

**अन्वयः।**

चिराय संस्तुतं तमः एव शनैः प्रकाशतां प्रतिपद्येत। स्वयं परिशीलितः सः तिक्तः रसः च सुतरां मधुरायते।

**भावार्थः।**

चिरकालात् परिचितः अन्धकारः क्रमेण प्रकाशरूपतां भजते। पुनःपुनः परिशीलितः तिक्तरसः क्रमेण मधुर इव प्रतिभाति।

**वृत्तम् - वियोगिनी। (अर्धसमवृत्तम्)**

उदा -

| स | स | ज | गु |
|---|---|---|---|
| UU– | U U– | U – U | – |
| तम ए | व चिरा | य संस्तु | तं |

| स | भ | र | ल गु |
|---|---|---|---|
| UU– | –UU | –U– | U– |
| प्रतिप | द्येत श | नैः प्रका | शताम्। |

सुतरां मधुरायते स्वयं

स च तिक्तः परिशीलितो रस :॥

अस्मिन् श्लोके विषमपादयोः - प्रथमतृतीययोः सगण - सगण - जगणाः गुरुः चेति दश वर्णाः समपादयोः - द्वितीयचतुर्थयोः - सगण - भगण - रगणाः लघुः गुरुः चेति एकादश वर्णाः च भवन्ति। अतःवियोगिनी नाम वृत्तं भवति। तल्लक्षणं तु -

**विषमे ससजा गुरुः समे**
**सभरा लोऽथ गुरुर्वियोगिनी।**

अपरोदाहरणाय पठनप्रवर्तनं पश्यतु। (पु.सं. ७०, न हि देहिनि .....।)

# २. प्ररोदनम् ।

महाकविना एन्.कुमारनाशान् महोदयेन कैरल्यां विरचितं तत्त्वचिन्तापरं विलापकाव्यं भवति प्ररोदनम् । अस्य काव्यस्य संस्कृतानुवादः तन्नाम्ना एव वासुदेवगणकमहोदयेन कृतः। तत्र मानवानां जीवितं, मरणं, भोगनश्वरता इत्यादिविषयाणां वीक्षणं समीपनं च व्यक्ततया आविष्करोति । आशान् महोदयस्य मित्रम्, आराध्यः, अनुकार्यः, गुरुः च भवति श्रीमान् ए.आर्. राजराजवर्मा महोदयः। सहोदरनिर्विशेषस्य स्वप्रतिभाप्रचोदकस्य च राजराजवर्मणः अकालवियोगादुद्भूतः शोकः एव काव्यस्य अस्य निदानमासीत् । मूलपद्यस्य पठनाय अनुबन्धं पश्यतु (पु.सं. ७२, ७३) ।



**कष्टं ! स्थानमहत्वमीषदपि सद्वर्णः प्रभुत्वं कुलं**
**दृष्टश्रीर्न शरीरधाटिरपि वा घोराग्निना गण्यते ।**
**स्पष्टं सम्प्रविशन्निहाऽस्तमयते सर्वोऽपि गर्वो नृणा -**
**मिष्टा हन्त ! वियुञ्जते दृढमसावध्यात्मविद्यालयः ॥**

(श्लोकसंख्या - ३५)



### पदच्छेदः।

| | | |
|---|---|---|
| स्थानमहत्वमीषदपि | - | स्थानमहत्वम् + ईषत् + अपि । |
| दृष्टश्रीर्न | - | दृष्टश्रीः + न । |
| शरीरधाटिरपि | - | शरीरधाटिः + अपि । |
| सम्प्रविशन्निहाऽस्तमयते | - | संप्रविशन् + इह + अस्तम् + अयते । |
| सर्वोऽपि | - | सर्वः + अपि । |
| नृणामिष्टा | - | नृणाम् + इष्टा । |
| दृढमसावध्यात्मविद्यालयः। | - | दृढम् +असौ + अध्यात्मविद्यालयः । |

### पदार्थः।

| | | |
|---|---|---|
| स्थानमहत्वं | - | स्थानगौरवं |
| सद्वर्णः | - | सुरूपम् (सज्जातिः) |

| | | |
|---|---|---|
| प्रभुत्वं | - | आधिपत्यं |
| कुलं | - | सद्वंशः / वंशमहिमा |
| दृष्टश्रीः | - | प्रत्यक्षम् ऐश्वर्यं |
| शरीरधाटिः | - | देहबलसौभगादि |
| अपि वा | - | सर्वमपि |
| घोराग्निना | - | तीव्राग्निना |
| ईषदपि | - | अल्पम् अपि |
| न गण्यते | - | न परिगण्यते (शवाग्निः सर्वं नाशयति)। |
| नृणां | - | मनुष्याणां |
| सर्वः गर्वः अपि | - | कृत्स्नः अहङ्कारः अपि/ अभिमानम् अपि |
| इह | - | अत्र (अस्मिन् शवाग्नौ) |
| संप्रविशन् | - | अन्तः गच्छन् |
| अस्तम् | - | नाशं |
| अयते | - | प्राप्नोति |
| स्पष्टं | - | निश्चितं |
| इष्टाः | - | इष्टजनाः |
| वियुञ्जते | - | वियोगं प्राप्नुवन्ति |
| हन्त ! | - | हा ! हा ! / कष्टम् ! |
| असौ | - | अयं |
| अध्यात्मविद्यालयः | - | आत्मविज्ञानभूमिः |
| दृढम् | - | इति निश्चितम् । |

### विग्रहः।

| | | |
|---|---|---|
| स्थानमहत्वम् | - | स्थाने महत्वम् । |
| सद्वर्णः | - | सन् चासौ वर्णः च । |
| प्रभुत्वम् | - | प्रभोः भावः। |
| दृष्टश्रीः | - | दृष्टा चासौ श्रीः च । |
| शरीरधाटिः | - | शरीरस्य धाटिः । |
| घोराग्निना | - | घोरः चासौ अग्निः च घोराग्निः, तेन । |
| अध्यात्मविद्यालयः | - | आत्मनि इति अध्यात्मम् । अध्यात्मं विद्या अध्यात्मविद्या । अध्यात्मविद्यायाः आलयः । |

**अन्वयः।**

स्थानमहत्वं सद्वर्णः प्रभुत्वं कुलं दृष्टश्रीः शरीरधाटिरपि वा (सर्वं) घोराग्निना ईषदपि न गण्यते। कष्टम् ! नृणां सर्वोऽपि गर्वः इह (अग्निं) सम्प्रविशन् अस्तम् अयते। स्पष्टम्। इष्टा वियुञ्जते। हन्त! असौ अध्यात्मविद्यालयः (भवति ) (इति) दृढम्।

**भावार्थः।**

एकस्य मनुष्यस्य स्थानगौरवं, सुरूपम्, आधिपत्यं, वंशमहिमा, प्रत्यक्षमैश्वर्यं (शरीरसौन्दर्यं) शरीरदाढ्र्यमित्येतत् सर्वमपि अन्तिमकाले शवाग्निना न परिगण्यते। सर्वमपि नाशं प्राप्नोति। नराणां सर्वोऽपि गर्वः अस्मिन् शवाग्नौ प्रविशन् नाशं प्राप्नोति। अत्र प्रीतिविषयाः अपि जनाः वियुक्ताः एव भवन्ति इति निश्चयम्। नूनम् अयम् अध्यात्मविद्यालयः इति। तत्र हि आत्मज्ञाने जाते लौकिकशरीरमहत्वं न परिगण्यते। अहङ्कारः नश्यति। इष्टजनाः वियुञ्जते।

**वृत्तं - शार्दूलविक्रीडितम्। (समवृत्तम्)**

| म | स | ज | स | त | त | गु |
|---|---|---|---|---|---|---|
| – – – | UU– | U–U | UU– | ––U | ––U | – |
| कष्टं ! स्था | नमह | त्वमीष | दपि स | द्वर्णः प्र | भुत्वं कु | लं |

दृष्टश्रीर्न शरीरधाटिरपि वा घोराग्निना गण्यते।
स्पष्टं सम्प्रविशन्निहाऽस्तमयते सर्वोऽपि गर्वो नृणा -
मिष्टा हन्त ! वियुञ्जते दृढमसावध्यात्मविद्यालयः॥

अस्मिन् श्लोके प्रतिपादं मगण – सगण - जगण - सगण - तगण – तगणाः - गुरुश्च यथाक्रमं भवन्ति। अतः शार्दूलविक्रीडितं नाम वृत्तम्। अत्र द्वादशभिः, ततः सप्तभिश्च वर्णैः (एकोनविंशतितमे वर्णे) यतिः। प्रतिपादं एकोनविंशति वर्णाः भवन्ति। (सूर्याः- द्वादश, अश्वाः - सप्त) तल्लक्षणं तु -

**सूर्याश्वैर्मसजास्तताः सगुरवः शार्दूलविक्रीडितम्।**

अपरोदाहरणाय पठनप्रवर्तनं पश्यतु। (पु.सं.७१, पातुं न प्रथमं............।)

यास्यत्यद्य इत्यादि पठितश्लोकम् अपि शार्दूलविक्रीडिते निबद्धं भवति (पु.सं. १६)।

## ३. मयूरदूतम् ।

नवोत्थाननायकेषु अन्यतमः महान् कैरलीसाहित्यकारः भवति श्रीमान् केरलवर्मा वलियकोयित्तम्पुरान् । एतेन स्वानुभवमाधारीकृत्य लिखितं मणिप्रवालकाव्यं भवति मयूरसन्देशः। अस्य काव्यस्य संस्कृतानुवादः डा. पी.के. नारायणपिल्लमहोदयेन कृतः।

आयिल्यं तिरुनाल् महाराजस्य अप्रीतिपात्रोऽभवत् केरलवर्मा वलियकोयित्तम्पुरान् । तेन कारणेन सः आलप्पुझायां ततः हरिप्पाट् देशे च पञ्चवर्षं (१८७५ - १८८०) तावत् कारागृहवासम् अन्वभूत् । कारागृहात् विमुक्तेन तेन त्रयोदशवर्षानन्तरं १८९३ तमे वर्षे कैरल्यां लिखितं तस्मिन्नेव वर्षे प्रसिद्धीकृतं च काव्यं भवति मयूरसन्देशः। काव्येऽस्मिन् प्रियतमायाः महाराणी लक्ष्मीभाई तम्पुराट्ट्याः विरहेण तप्तः सः हरिप्पाट् सुब्रह्मण्यस्वामिक्षेत्रे दृष्टं मयूरं दूतरूपेण नियोजयामास । अनन्तपुर्यां स्थितायै स्वप्रियतमायै सन्देशं प्रेषितुं मार्गवर्णनं करोति कविः। पत्तियूर् देशस्थाः केदाराः एव अत्र वर्णनाविषयः।
मूलपद्यस्य पठनाय अनुबन्धं पश्यतु (पु.सं. ७३) ।

**केदारान् द्विस्त्रिरपि सुतरां वापयोग्यान् समृद्ध्यै**
**कच्छानच्छानलिकुलिरयोः केलिरङ्गायमाणान् ।**
**नावो दण्डप्रकरघटिताः प्रेर्यमाणाश्च दाशै -**
**र्दर्शं दर्शं विहग ! सरितां तीरमार्गेण यायाः ॥**

(श्लोकसंख्या - २३)



### पदच्छेदः।

द्विस्त्रिरपि - द्विः + त्रिः + अपि ।
प्रेर्यमाणाश्च - प्रेर्यमाणाः + च ।
दाशैर्दर्शं दर्शम् - दाशैः + दर्शं दर्शम् ।

### पदार्थः।

हे विहग! - हे खग ! (मयूर!)
सुतरां समृद्ध्यै - अत्यन्तं सम्पुष्टतायै
द्विः त्रिः अपि - द्विवारं त्रिवारं वा

| | | |
|---|---|---|
| वापयोग्यान् | - | बीजवापनार्हान् |
| केदारान् | - | क्षेत्राणि |
| अलिकुलिरयोः | - | भृङ्गकर्कटकयोः |
| केलिरङ्गायमाणान् | - | लीलारङ्गमिव वर्तमानान् |
| अच्छान् | - | स्वच्छान् |
| कच्छान् | - | तीरप्रदेशान् |
| दण्डप्रकरघटिताः | - | दण्डव्यूहेन घटिताः |
| दाशैः | - | नाविकैः |
| प्रेर्यमाणाः | - | चाल्यमाणाः |
| नावः | - | नौकाः (च) |
| दर्शं दर्शं | - | दृष्ट्वा दृष्ट्वा (पुनः पुनः पश्यन्) |
| सरितां | - | नदीनां |
| तीरमार्गेण | - | तटमार्गेण |
| यायाः। | - | त्वं प्रयाणं कुरु। |

**विग्रहः।**

| | | |
|---|---|---|
| वापयोग्यान् | - | वापस्य योग्याः वापयोग्याः। तान्। |
| केलिरङ्गायमाणान् | - | केल्याः रङ्गं केलिरङ्गम्। केलिरङ्गम् इव आचरन्ति इति तान्। |
| दण्डप्रकरघटिताः | - | दण्डानां प्रकरः दण्डप्रकरः। दण्डप्रकरेण घटिताः। |

**अन्वयः।**

हे विहग! सुतरां समृद्ध्यै द्विस्त्रिरपि वापयोग्यान् केदारान् अलिकुलिरयोः केलिरङ्गायमाणान् अच्छान् कच्छान् दण्डप्रकरघटिताः दाशैः प्रेर्यमाणाः नावः च दर्शं दर्शं सरितां तीरमार्गेण यायाः।

**भावार्थः।**

क्षेत्राणि अत्यन्तं समृद्ध्यै द्विवारं त्रिवारं वा बीजवापनार्हाणि भवन्ति। स्वच्छाः तीरप्रदेशाः भृङ्गकुलिरयोः विहाररङ्गमिव वर्तमानाः सन्ति। नाविकैः चाल्यमानाः अनेकदण्डघटिताः नावः भवन्ति। हे मयूर! त्वम् एतान् सर्वान् पश्यन् पश्यन् नदीनां तीरमार्गेण प्रयाणं कुरु।

## ४. निवातकवचकालकेयवधम् ।

कोट्टयत्तु तम्पुरान् महाभागेन विरचिता आट्टक्कथा भवति निवातकवचकालकेयवधम् । महाभारतस्य आरण्यपर्वात् उद्धृते इतिवृत्ते अर्जुनस्य देवलोकाभिगमनं वर्णयति । देवेन्द्रसारथिना मातलिना देवलोकम् आनीतः अर्जुनः इन्द्रम् अवन्दत । तदनु वज्रकेतुः वज्रबाहुः इति असुरद्वयं विजित्य देवस्त्रीणां मोचनं च अकरोत् । तस्मिन्नवसरे पराक्रमशालिनः अर्जुनस्य कामदेवसदृशं सौन्दर्यं दृष्ट्वा आकृष्टा उर्वशी अनुरागेण वक्तुमारभते । अयमेव श्लोकसन्दर्भः।

**कल्पद्रुकल्पद्रुपदेन्द्रपुत्री -**<br>
**सारस्यसारस्य निवासभूमिम् ।**<br>
**नालीकनालीकशरार्दिता सा**<br>
**मन्दाक्षमन्दाक्षरमेवमूचे ।।**

(श्लोकसंख्या - २०८)

**पदच्छेदः**

एवमूचे - एवम् + ऊचे ।

**पदार्थः -**

कल्पद्रुकल्पद्रुपदेन्द्रपुत्रीसारस्यसारस्य - कल्पवृक्षसमानस्य पाञ्चालराजस्य पुत्री द्रौपदी, तस्याः सरसतायाः सारस्य

निवासभूमिम् - वासस्थानं (अर्जुनम्)



| | | |
|---|---|---|
| नालीकनालीकशरार्दिता | - | पद्मशरस्य (कामदेवस्य) शरेण पीडिता (नालीकनालीकम् - प्रथमस्य नालीकशब्दस्य पङ्कजमिति द्वितीयस्य नालीकशब्दस्य शरः इति च अर्थः ।) |
| सा | - | उर्वशी |
| मन्दाक्षमन्दाक्षरम् | - | लज्जया मन्दस्वरेण |
| एवम् ऊचे | - | इत्थम् उवाच । |

**विग्रहः**

| | | |
|---|---|---|
| कल्पद्रुकल्पद्रुपदेन्द्रपुत्रीसारस्यसारस्य | - | ईषदूनः कल्पद्रुः कल्पद्रुकल्पः, सः चासौ द्रुपदेन्द्रः, तस्य पुत्री, तस्याः सारस्यम्, तस्य सारः, तस्य । |
| निवासभूमिम् | - | निवासस्य भूमिः निवासभूमिः । ताम् । |
| नालीकनालीकशरार्दिता | - | नालीकं नालीकं यस्य सः नालीकनालीकः, तस्य शरः नालीकनालीकशरः, तेन अर्दिता । |
| मन्दाक्षमन्दाक्षरम् | - | मन्दाक्षेण मन्दम् अक्षरं यथा तथा । |

**अन्वयः -**

सा कल्पद्रुकल्पद्रुपदेन्द्रपुत्रीसारस्यसारस्य निवासभूमिम्, नालीकनालीकशरार्दिता मन्दाक्ष - मन्दाक्षरम् एवम् ऊचे ।

**भावार्थः -**

कल्पवृक्षसमानस्य पाञ्चालराजस्य पुत्र्याः द्रौपद्याः रसिकत्वस्य वासस्थानम् अर्जुनं कामबाणेन पीडिता सा उर्वशी लज्जया मन्दस्वरेण इत्थम् उवाच । (पु. सं. ७३)

**वृत्तम् - इन्द्रवज्रा ।** (पठितपूर्वम् - Std VIII & IX T.B. पु.सं. २३&२४)

**अलङ्कारः- यमकम् । ( शब्दालङ्कारः )**

प्रथमपादे कल्पद्रुशब्दः, द्वितीये सारस्यशब्दः, तृतीये नालीकशब्दः, चतुर्थे मन्दाक्षशब्दः च आवर्त्य अर्थभेदेन प्रयुक्ताः इत्यतः अत्र यमकालङ्कारः। तल्लक्षणं तु -

**अव्यपेतव्यपेतात्मा व्यावृत्तिर्वर्णसंहतेः।**
**यमकं तच्च पादानामादिमध्यान्तगोचरम् ॥**

अव्यपेतव्यपेतात्मा वर्णसंहतेः व्यावृत्तिः यमकं, तच्च पादानामादिमध्यान्तगोचरम् इत्यन्वयः। अव्यपेतः अव्यवहितः व्यपेतः व्यवहितश्च आत्मा स्वरूपं यस्य सः अव्यपेतव्यपेतात्मा । वर्णसंहतेः स्वरव्यञ्जनसमुदायरूपस्य व्यावृत्तिः विशेषेण आवृत्तिः पुनः पुनरुच्चारणं यमकमिति लक्षणम् । अपरोदाहरणाय पठनप्रवर्तनं पश्यतु । (पु.सं.७०, नवपलाश..........।)

## ५. नारायणीयम् ।

श्रीमता मेल्पुत्तूर् नारायणभट्टपादेन विरचितं भक्तिकाव्यं भवति नारायणीयम् । नारायणेन नारायणमधिकृत्य रचितम् इति कारणेन काव्यस्य नारायणीयम् इति नाम । काव्ये शतं दशकानि सन्ति । काव्यस्य 'चतुर्विंशति गुरवः' इति नामकात् त्रयोनवतितमात् दशकात् उद्धृतोऽयं श्लोकः । श्लोकोऽयं स्वस्य सखा रिपुः च स्वयमेव इत्यर्थं सूचयति ।

**क्षुत्तृष्णालोपमात्रे सततकृतधियो जन्तवः सन्त्यनन्ता -**
**स्तेभ्यो विज्ञानवत्त्वात् पुरुष इह वरस्तज्जनिर्दुर्लभैव ।**
**तत्राप्यात्माऽऽत्मनः स्यात्सुहृदपि च रिपुर्यस्त्वयि न्यस्तचेता-**
**स्तापोच्छित्तेरुपायं स्मरति स हि सुहृत्स्वात्मवैरी ततोऽन्यः ।।**

(दशकः ९३ श्लोकसंख्या २)

### पदच्छेदः ।

| | | |
|---|---|---|
| सन्त्यनन्तास्तेभ्यो विज्ञानवत्त्वात् | - | सन्ति + अनन्ताः + तेभ्यः + विज्ञानवत्त्वात् । |
| वरस्तज्जनिर्दुर्लभैव | - | वरः + तज्जनिः + दुर्लभा + एव । |
| तत्राप्यात्माऽऽत्मनः | - | तत्र + अपि + आत्मा +आत्मनः। |
| रिपुर्यस्त्वयि | - | रिपुः + यः +त्वयि । |
| न्यस्तचेतास्तापोच्छित्तेरुपायम् | - | न्यस्तचेताः + तापोच्छित्तेः +उपायम् । |
| ततोऽन्यः | - | ततः + अन्यः । |

### पदार्थः।

| | |
|---|---|
| क्षुत्तृष्णालोपमात्रे | बुभुक्षापिपासयोः शमनमात्रे |
| सततकृतधियः | सर्वदा कृतमतयः |
| जन्तवः | धेन्वादयः प्राणिनः |
| अनन्ताः सन्ति | अनेके सन्ति । |
| इह | अस्यां भूमौ |
| पुरुषः | मनुष्यः |
| विज्ञानवत्त्वात् | विशिष्टज्ञानसम्पन्नत्वात् (तत्त्वज्ञानादिरूपं विशिष्टज्ञानम्) |
| तेभ्यः | धेन्वादि जन्तुभ्यः |
| वरः (भवति) | श्रेष्ठः (भवति) |
| तज्जनिः | तस्य जन्म (नरजन्म) |
| दुर्लभा एव | लब्धुं क्लेशकरमेव (सुकृतमूलत्वात्)। |

(विशेषमाह तत्रापि इत्यादिना)

| | |
|---|---|
| तत्रापि | मनुष्येषु अपि |
| आत्मा | स्वयम् |
| आत्मनः | स्वस्य |
| सुहृत् | उपकारी |
| रिपुः अपि | अपकारी च |
| स्यात् | भवेत्। |
| (विशेषमाह यः इत्यादिना) | |
| यः | यः आत्मा |
| त्वयि | भगवति विष्णौ |
| न्यस्तचेताः (सन्) | निवेशितमनाः (सन्) |
| तापोच्छित्तेः | दुःखनिवृत्तेः |
| उपायम् | साधनम् |
| स्मरति | जानाति |
| सः | सः पुमान् |
| आत्मनः | स्वस्यैव |
| सुहृत् | मित्रम् |
| ततः अन्यः | तस्मादितरः |
| स्वात्मवैरी च भवति हि। | स्वस्यैव रिपुः भवति (हि इति प्रसिद्धौ)। |

**विग्रहः।**

| | | |
|---|---|---|
| क्षुत्तृष्णालोपमात्रे | - | क्षुत् च तृष्णा च क्षुत्तृष्णे। क्षुत्तृष्णयोः लोपः क्षुत्तृष्णालोपः। क्षुत्तृष्णालोप एव क्षुत्तृष्णालोपमात्रम्। तस्मिन्। |
| सततकृतधियः | - | सततं कृता धीःयैः ते। |
| विज्ञानवत्त्वात् | - | विज्ञानम् अस्य अस्तीति विज्ञानवान्, तस्य भावः विज्ञानवत्त्वं, तस्मात्। |
| तज्जनिः | - | तस्य जनिः (जन्म)। |
| दुर्लभा | - | दुःखेन लब्धुं शक्या। |
| न्यस्तचेताः | - | न्यस्तं चेतः यस्य सः। |
| तापोच्छित्तेः | - | तापानाम् उच्छित्तिः तापोच्छित्तिः। तस्याः। (आधिभौतिकम्, आधिदैविकम्, आध्यात्मिकम् इति तापत्रयम्।) |
| स्वात्मवैरी | - | स्वमेव आत्मा स्वात्मा। स्वात्मनः वैरी। (स्वात्मा वैरी यस्य इति वा।) |

**अन्वयः -** क्षुत्तृष्णालोपमात्रे सततकृतधियः जन्तवः अनन्ताः सन्ति । तेभ्यः इह पुरुषः विज्ञानवत्त्वात् वरः। तज्जनिः दुर्लभा एव । तत्रापि आत्मनः आत्मा सुहृत् अपि स्यात् रिपुः च । यः त्वयि न्यस्तचेताः (सन्) तापोच्छित्तेः उपायं स्मरति सः हि सुहृत्, ततः अन्यः स्वात्मवैरी ।

**भावार्थः -** इह लोके केवलं क्षुत्पिपासापूरणाय बद्धश्रद्धाः असंख्याताः पशवः सन्ति । तेभ्यः मनुष्यः श्रेष्ठः विज्ञानवत्त्वात् । मानवजन्म अतीव दुर्लभं भवति । तेषु मनुष्यजीविषु आत्मैव मित्रत्वेन शत्रुत्वेन च भवेत् । तत्रापि आत्मनः आत्मा सुहृत् अपि स्यात् रिपुःच स्यात् । त्वयि विन्यस्तचेताः सन् तापत्रयनिर्मूलनार्थं यः उपायं स्मरति सः हि सुहृत् । ततः अन्यः स्वात्मशत्रुरेव (पु.सं. ७३, ७४ च ) ।

**वृत्तम् - स्रग्धरा (समवृत्तम्)**

| म | र | भ | न | य | य | य |
|---|---|---|---|---|---|---|
| – – – | –U– | –UU | UUU | U – – | U – – | U – – |
| क्षुत्तृष्णा | लोपमा | त्रे सत | तकृत | धियो ज | न्तवः स | न्त्यनन्ता - |

स्तेभ्यो विज्ञानवत्त्वात् पुरुष इह वरस्तज्जनिर्दुर्लभैव ।
तत्राप्यात्माऽऽत्मनः स्यात्सुहृदपि च रिपुर्यस्त्वयि न्यस्तचेता-
स्तापोच्छित्तेरुपायं स्मरति स हि सुहृत्स्वात्मवैरी ततोऽन्यः॥

अस्मिन् पद्ये प्रतिपादं मगण - रगण - भगण - नगण - यगण - यगण - यगणाः यथाक्रमं भवन्ति इत्यतः स्रग्धरा नाम वृत्तम् । अत्र सप्तभिः, ततः सप्तभिः (चतुर्दशे वर्णे) ततः सप्तभिश्च वर्णैः (एकविंशतितमे वर्णे) यतिः। प्रतिपादम् एकविंशति वर्णाः भवन्ति । (त्रिमुनिः - त्रिः– त्रिवारम्, मुनिः - सप्त ऋषयः ।) स्रग्धरायाः लक्षणं तु –

**म्रभ्नैर्यानां त्रयेण त्रिमुनियतियुता स्रग्धरा कीर्तितेया ।**

अपरोदाहरणाय पठनप्रवर्तनं पश्यतु । (पु.सं. ७१, अस्तित्वं कार्यसिद्धेः .............।)

**अलङ्कारः – विरोधाभासः।**

अत्र संसारतापनिवृत्तिरूपमोक्षोपायज्ञस्य सुहृत्त्वोक्त्या तस्य गुरुत्वमपि दर्शितम् । अनेन आत्मनः गुरुः आत्मैवेत्यादि श्लोकार्थो दर्शितः। आत्मा आत्मनः रिपुः सुहृत् च इत्यत्र व्यङ्ग्यो विरोधाभासो नाम अलङ्कारः । त्वयि विन्यस्तचेताः सन् तापत्रयनिर्मूलनार्थं यः उपायं स्मरति सः हि सुहृत् । ततः अन्यः स्वात्मशत्रुरेव इति विरोधस्य परिहारात् विरोधाभासः। (लक्षणं पु.सं. १० मध्ये विशदीकृतम् ।)

**" उपमैका शैलूषी सम्प्राप्ता चित्रभूमिकाभेदान् ।**
**नृत्यन्ती काव्यरङ्गे रञ्जयति तद्विदां चेतः॥ "**
( शैलूषी - नटी, चित्रभूमिकाभेदान् - विचित्रवेदिकाविशेषान् । )

## पठनप्रवर्तनानि।

### श्लोकव्याख्यानं पठित्वा सङ्घे चर्चित्वा अन्वयं लिखतु।

श्रद्धेयाः अंशाः-

- व्याख्यापठनम्।
- सङ्घे चर्चा।
- अन्वयलेखनम्।

### सङ्घे चर्चित्वा पाठभागस्थश्लोकानाम् आशयं स्वांशीकृत्य लिखतु।

श्रद्धेयाः अंशाः-

- व्याख्यानं पठित्वा चर्चा।
- श्लोकार्थज्ञानम्।
- आशयलेखनम्।

### अधोदत्तं श्लोकं पठित्वा लक्ष्यलक्षणसमन्वयपूर्वकम् अलङ्कारं विशदयतु टिप्पणिं च लिखतु।

**नवपलाशपलाशवनं पुरः**
**स्फुटपरागपरागतपङ्कजम्।**
**मृदुलतान्तलतान्तमलोकयत्**
**ससुरभिं सुरभिं सुमनोभरैः॥**

(शिशुपालवधम् ,६-२)

श्रद्धेयौ अंशौ-

- अलङ्कारज्ञानम्।
- लक्षणसमन्वयपूर्वकं समर्थनम्।

### अधोदत्तानां श्लोकानां गणनिर्णयं कृत्वा लक्ष्यलक्षणसमन्वयपूर्वकं वृत्तं समर्थयतु। टिप्पणिं च लिखतु।

क) **नहि देहिनि शोभनं भवे-**
**च्चरितार्थे सति जीवितं पुनः।**
**सुतरां नटने समापिते**
**स च रङ्गाद्विरमेत् कुशीलवः॥** ( सीताविचारलहरी, श्लो. सं. १६८)

ख) **पातुं न प्रथमं व्यवस्यति जलं युष्मास्वपीतेषु या**
**नादत्ते प्रियमण्डनापि भवतां स्नेहेन या पल्लवम् ।**
**आद्ये वः कुसुमप्रसूतिसमये यस्या भवत्युत्सवः**
**सेयं याति शकुन्तला पतिगृहं सर्वैरनुज्ञायताम् ॥**

(अभिज्ञानशाकुन्तलम्, ४ - ९)

ग) **अस्तित्वं कार्यसिद्धेः स्फुटमथ कथयन्पक्षयोः कम्पभेदै -**
**राख्यातुं वृत्तमेतन्निषधनरपतौ सर्वमेकः प्रतस्थे ।**
**कान्तारे निर्गतासि प्रियसखि ! पदवी विस्मृता किन्तु मुग्धे**
**मा रोदीरेहि यामेत्युपहृतवचसो निन्युरन्यां वयस्याः ॥**

(नैषधीयचरितम्, ३ - १३२)

श्रद्धेयाः अंशाः-

- गणनिर्णयः।
- वृत्तसमर्थनम् ।
- टिप्पणीलेखनम् ।
- अवतारणम् ।

**पाठभागस्थश्लोकान् कक्ष्यायाम् तालालयसमन्वितम् आलपतु शब्दमुद्रणं च करोतु ।**

श्रद्धेयाः अंशाः-

- समानवृत्तबद्धश्लोकानां श्रवणम् ।
- आलपनाभ्यासः।
- आलपनम् ।
- ICT द्वारा शब्दमुद्रणम् ।

**द्वितीये अनुबन्धे दत्तां जीवनचरितरूपरेखां पठित्वा पूर्णवाक्येन विपुलीकरोतु ।**

श्रद्धेयाः अंशाः-

- अनुबन्धपठनम् ।
- सङ्घचर्चा ।
- आशयग्रहणम् ।
- विपुलीकरणम् ।

**विशेषज्ञैः सह अभिमुखं कृत्वा आधुनिककवीनां काव्यानां च ज्ञानं सम्पाद्य पट्टिकां रचयतु । कक्ष्यायाम् अवतारयतु च ।**

श्रद्धेयाः अंशाः-

- विशेषज्ञैः सह अभिमुखम् ।
- पट्टिकारचना ।
- कक्ष्यायाम् अवतारणम् ।

अनुबन्धः।

## 1. पाठभागस्थश्लोकानां कैरल्या अनुवादः।

ഒരുവേള പഴക്കമേറിയാ-
ലിരുളും മെല്ലെ വെളിച്ചമായ് വരാം
ശരിയായ് മധുരിച്ചിടാം സ്വയം
പരിശീലിപ്പൊരു കയ്പുതാനുമേ.

(ചിന്താവിഷ്ടയായ സീത, മഹാകവി എൻ. കുമാരനാശാൻ, പദ്യം – 31)

നിത്യപരിചയം കൊണ്ട് ഇരുട്ട് വെളിച്ചമായും കയ്പ് മധുരമായും അനുഭവപ്പെടാം. (നിരന്തരമുണ്ടാകുന്ന ദുഃഖാനുഭവങ്ങൾ സഹിക്കുവാനുള്ള മനോനില സ്വയമുണ്ടായിക്കൊള്ളുമെന്ന് താത്പര്യം.)

### ചിന്താവിഷ്ടയായ സീത - ഒരവലോകനം

പ്രഖ്യാതകഥാപാത്രങ്ങളെ പുനരാവിഷ്കരിക്കുക എന്നത് അസാധാരണപാടവം ആവശ്യമായിവരുന്ന ഒരു കലാകർമ്മമാണ്. ഈ രീതിയിൽ വിജയം വരിച്ചവ മലയാളത്തിൽ ചുരുക്കമായിട്ടേയുള്ളു. അവയുടെ നടുനായകമാണു ആശാന്റെ ചിന്താവിഷ്ടയായ സീത. സീതയുടെ ഈ വിചാരപ്രവാഹത്തിലൂടെ ആശാൻ വാല്മീകിയുടെ സീതയെ കൂടുതൽ വ്യക്തിത്വമുള്ള ഒരു ഭാരതീയവനിതയാക്കി ഉയർത്തിയിട്ടുണ്ട്. ഭർത്താവിന്റെ നിർമ്മര്യാദമായ ചെയ്തികളെ വിമർശിക്കുന്നതിനുള്ള തന്റേടവും സ്വതന്ത്രബുദ്ധിയും രാമായണസീതതന്നെ പ്രകടിപ്പിച്ചിട്ടുണ്ട്. ആ സ്ഥിതിക്ക്, രാമായണകഥ അയോദ്ധ്യാനിവാസികളുടെ മുമ്പിൽ ഗാനം ചെയ്ത് സീതയുടെ വിശുദ്ധി അംഗീകരിപ്പിക്കുകയും അവളെ രാജപത്നിയായി പുനഃപ്രതിഷ്ഠിക്കുകയും ചെയ്ക എന്ന ലക്ഷ്യത്തോടുകൂടി വാല്മീകിമഹർഷി ലവകുശന്മാരെയും കൂട്ടിക്കൊണ്ട് അയോദ്ധ്യയിലേയ്ക്കു പോയിരിക്കുന്ന സുപ്രധാന മുഹൂർത്തത്തിൽ, സീതാദേവിയുടെ അന്തരാത്മാവിലുയരുന്ന വേദനാമയങ്ങളായ ചിന്തകളെ പകർത്തിയ മഹാകവി സഹൃദയരുടെ മാത്രമല്ല, ജീവിതത്തിലെ വിഷമസന്ധികളെയും അപ്പോഴത്തെ മാനസികക്ലേശങ്ങളെയും അഭിമുഖീകരിച്ചിട്ടുള്ള എല്ലാ മനുഷ്യരുടെയും കൃതജ്ഞതയാണർഹിക്കുന്നത്. സുഖത്തെയും ദുഃഖത്തെയും ജീവിതനശ്വരതയേയും കുറിച്ചുള്ള ചർച്ചകൾ ഈ കൃതിയിലും കാണപ്പെടുന്നുണ്ട്.

(കടപ്പാട്)

കഷ്ടം! സ്ഥാനവലിപ്പമോ പ്രഭുതയോ
സജ്ജാതിയോ വംശമോ
ദൃഷ്ടശ്രീ തനുധാടിയോ ചെറുതുമി-
ങ്ങോരില്ല ഘോരാനലൻ
സ്പഷ്ടം മാനുഷഗർവ്വമൊക്കെയിവിടെ-
പ്പുക്കസ്തമിക്കുന്നിതി-
ങ്ങിഷ്ടന്മാർ പിരിയുന്നു! ഹാ! -ഇവിടമാ-
ണദ്ധ്യാത്മവിദ്യാലയം!

(പ്രരോദനം, മഹാകവി എൻ. കുമാരനാശാൻ – പദ്യം – 35)

ശരീരസംബന്ധമായ ദുരഭിമാനമൊന്നും യാതൊരർത്ഥവുമുള്ളതല്ലെന്നും മരിച്ചുപോകുന്നവന് ബന്ധുക്കളിൽ ആരും തുണയാകയില്ലെന്നും ഈ ശ്മശാനത്തിൽ വച്ച് സ്പഷ്ടമായി മനസ്സിലാകുന്നു. അതുകൊണ്ട് കാണികൾക്ക് വൈരാഗ്യമുദിക്കുകയും തദ്വാരാ തത്ത്വബോധമുണ്ടാകയും ചെയ്യുമെന്നു താല്പര്യം.

## കവിയും കൃതിയും - ഒരവലോകനം

മലയാളകവിതാരംഗത്ത് ആശാൻ തെളിച്ച പാതയുടെ മഹത്വം കണ്ടറിഞ്ഞ അപൂർവം പേരിൽ മുഖ്യനായിരുന്നു എ. ആർ. രാജരാജവർമ്മ. സ്വസമുദായത്തിലും ഇതരസമുദായ ത്തിലുമുള്ള കുബുദ്ധികളാൽ അകാരണമായി അധിക്ഷിപ്തനായ ആശാന് രാജരാജവർമ്മ യെപ്പോലെ കലാതത്ത്വവാദിയായ ഒരു മഹാന്റെ ഹസ്താവലംബം എത്രത്തോളം പ്രധാനമാ യിരുന്നിരിക്കണം എന്ന് ഊഹിക്കാവുന്നതേയുള്ളൂ. അദ്ദേഹത്തിന്റെ പെട്ടെന്നുണ്ടായ നിര്യാണം കവിഹൃദയത്തെ വല്ലാതെ ചലിപ്പിച്ചു. പ്രരോദനത്തിന്റെ പിറവി അങ്ങനെയാണ്. എന്നാൽ ഒരു വിലാപകാവ്യമായ 'പ്രരോദന'ത്തിന് ഇതരവിലാപകാവ്യങ്ങളുമായുള്ള ഒരു വ്യത്യാസം ശ്രദ്ധാർഹമാണ്. വിലാപവിഷയമായ വ്യക്തി, കവിയുടെ ഹൃദയത്തോട് അടുത്തുനിന്ന പ്രിയപ്പെട്ട ഒരാൾ എന്നതിനേക്കാൾ ബുദ്ധിമണ്ഡലത്തോടടുത്തുനിന്ന് ബഹുമാനാദരങ്ങൾ ആർജ്ജിച്ച ഗുരുകല്പനായ ഒരാൾ ആയതിനാൽ ഇക്കാവ്യത്തിൽ വികാരത്തോടൊപ്പമോ അതിലേറെയോ ചിന്തയ്ക്കും പ്രാമാണ്യമുണ്ടായിത്തീർന്നു.

(കടപ്പാട്)

▶▶ രണ്ടും മൂന്നും തവണ കൃഷിയേറ്റുന്ന കണ്ടങ്ങളേയും
വണ്ടും ഞണ്ടും വടിവൊടു കളിക്കുന്ന കച്ഛങ്ങളേയും
തണ്ടും കെട്ടിത്തരമൊടു ചരിക്കുന്ന വള്ളങ്ങളേയും
കണ്ടും കൊണ്ടച്ചെറുപുഴകൾതൻ തീരമാർഗ്ഗേണ പോക.

(മയൂരസന്ദേശം, കേരളവർമ്മ വലിയകോയിത്തമ്പുരാൻ, പദ്യം – 23)

രണ്ടും മൂന്നും തവണ - അരിപ്പാട്ടുനിന്നു തെക്കുള്ള കണ്ടങ്ങൾ ഇരിപ്പൂനിലങ്ങളാകുന്നു. കച്ഛങ്ങൾ - വെള്ളം കെട്ടിനില്ക്കുന്ന താഴ്ന്ന പ്രദേശങ്ങൾ. പ്രായേണ – മിക്കവാറും, ഈ മാതിരി ഇടങ്ങളിൽ ആമ്പൽ മുതലായ പുഷ്പങ്ങൾ കാണും. അതിനാലാണു വണ്ടിനിവിടെ പ്രസക്തി. ചെറുപുഴകൾ, ഇടത്തോടുകൾ ഇവയിലൂടെ പ്രഭുക്കന്മാർ സാധാരണയായ് തണ്ടുവച്ച ഓടിവള്ളങ്ങളിൽ സഞ്ചരിക്കാറുണ്ട്. ഈ വർണ്ണനകൊണ്ട് മയിൽ കായങ്കുളത്തു കായൽ വഴി പോകാതെ സ്വല്പം കിഴക്കോട്ടു വന്നു പത്തിയൂർ മുതലായ ദിക്കിലൂടെ പോകണമെന്നാണ് കവിയ്ക്കുദ്ദേശ്യമെന്നു തോന്നുന്നു. (കടപ്പാട്)

▶▶ കല്പദ്രുകല്പദ്രുപദേന്ദ്രപുത്രീസാരസ്യസാരസ്യ = കൽപ്പവൃക്ഷത്തിന് തുല്യനായ ദ്രുപദരാജാവിന്റെ പുത്രിയുടെ (പാഞ്ചാലിയുടെ) സരസതയുടെ സത്തിന്; നിവാസഭൂമിം തം = നിവാസസ്ഥാനമായ അവനോട് (അർജുനനോട്); നാളീകനാളീകശരാർദ്ദിതാ സാ = താമരയെ അസ്ത്രമാക്കിയിരിക്കുന്നവന്റെ (കാമദേവന്റെ) ശരത്താൽ പീഡിതയായ അവൾ (ഉർവ്വശി); മന്ദാക്ഷമന്ദാക്ഷരം = ലജ്ജകൊണ്ട് അവ്യക്തങ്ങളായ അക്ഷരങ്ങളോട് കൂടി; ഏവം ഊചേ = ഇപ്രകാരം പറഞ്ഞു.

സാരം - കൽപ്പവൃക്ഷതുല്യനായ ദ്രുപദരാജാവിന്റെ പുത്രിയായ പാഞ്ചാലിയുടെ സരസതയുടെ സത്തിന് ഇരിപ്പിടമായ അർജ്ജുനനോട് കാമശരങ്ങൾകൊണ്ട് പീഡിതയായ അവൾ (ഉർവശി) ലജ്ജകൊണ്ട് അവ്യക്തങ്ങളായ അക്ഷരങ്ങളോട് കൂടി ഇപ്രകാരം പറഞ്ഞു. (കടപ്പാട്)

(നിവാതകവചകാലകേയവധം കഥകളി, കോട്ടയത്തു തമ്പുരാൻ, പദ്യം 208)

▶▶ വിശപ്പും ദാഹവും തീർക്കുന്നതിൽ മാത്രം ചിന്തയുള്ളവരായ എണ്ണമറ്റ ജന്തുക്കൾ ലോകത്തുണ്ട്. വിജ്ഞാനമുണ്ട് എന്നതിനാൽ മനുഷ്യൻ അവയിൽനിന്നും ശ്രേഷ്ഠനാ യിരിക്കുന്നു. വളരെ ദുർല്ലഭമായ ഒന്നാണ് മനുഷ്യജന്മം. (ഈ ജന്മത്തിൽ) അവന് അവൻ

തന്നെയാണ് സുഹൃത്തും അവൻ തന്നെയാണ് ശത്രുവും. അങ്ങയിൽ മനസ്സർപ്പിച്ചുകൊണ്ട് സംസാരതാപം തീർക്കാനുള്ള ഉപായം കണ്ടെത്തുന്നവനാണ് സുഹൃത്ത്. അങ്ങനെയല്ലാതുള്ളവൻ അവനുതന്നെ ശത്രുവായിത്തീരുന്നു. (കടപ്പാട്)

(നാരായണീയം, ശ്രീമദ് മേൽപ്പുത്തൂർ നാരായണഭട്ടപാദർ, ദശകം 93, ഇരുപത്തിനാല് ഗുരുക്കൻമാർ, ശ്ലോകം 2).

## 2. जीवनचरितरूपरेखा।

### क.) एन्. गोपालपिल्ला।

जन्म - 1901 आगस्त 10
कोल्लं जिल्लायाम् उमयनल्लूरदेशे अय्यनष़िकत्त् भवने।
पितरौ - पिता शङ्कुपिल्ला वैद्यर् माता नारायणि अम्मा च।
प्रवर्तनमण्डलं - संशोधकः (सर्वविज्ञानकोशम्) अध्यापकःच।
कृतयः - अनूदितकृतयः- गीताञ्जलिः, प्रेमसङ्गीतम्, सीताविचारलहरी च।
गद्यकृतयः - चिन्तादीपम्, कल्पनाशिल्पम्, मानवसंस्कारम् च। अनेकाः कविताः अपि लिखिताः।
देहवियोगः - 1968 जूण् 10

### ख.) के. वासुदेवगणकन्।

जन्म - 1914 मेय् 18
आलप्पुषा जिल्लायां चिङ्डोली ग्रामे कार्तिकप्पल्लि देशे कुन्नुङ्कल् भवने।
पितरौ - पिता कोच्चुपिल्ला माता कोच्चु।
प्रवर्तनमण्डलं - अध्यापकः कविः च।
कृतिः - प्ररोदनम् (संस्कृतम् - अनूदितकाव्यम्)।
देहवियोगः - 2013.

### ग.) डा. पि. के. नारायणपिल्ला।

जन्म - 1910 डिसेम्बर् 25,
पत्तनंतिट्ट जिल्लायां तिरुवल्ला देशे।
पितरौ - पिता गोदवर्मा माता लक्ष्मियम्मा।
प्रवर्तनमण्डलं - अध्यापक : संशोधकः कविः च।
कृतयः - धर्मसागरः, विश्वभानुः, कैरलीध्वनिः(कैरल्याम्) , मयूरदूतम् (अनूदितम्) च।
देहवियोगः - 1990 मार्च् 20

**घ.) कोट्टयत्तु तम्पुरान् ।**

जन्म - 1645 तमे वर्षे ।
कोट्टयं जिल्लायाम् ।

प्रशस्तिः - आट्टक्कथारचयिता ।

कृतयः - बकवधम्, कल्याणसौगन्धिकम्, निवातकवचकालकेयवधम्, किर्मीरवधम् च ।

देहवियोगः - 1705 तम वर्षात् पूर्वम् ।

**ङ.) मेल्पुत्तूर् नारायणभट्टपादः।**

जन्म - 1559
मलप्पुरम् जिल्लायां पोन्नानिदेशे मेल्पुत्तूर् भवने ।

पिता - मातृदत्तभट्टतिरी ।

प्रशस्तिः - कविः, दार्शनिकः।

कृतयः - प्रक्रियासर्वस्वम्, धातुकाव्यम्, मानमेयोदयम्, नारायणीयम्, श्रीपादसप्ततिः, प्रशस्तिकाव्यानि, प्रबन्धानि च ।

देहवियोगः - 1645.

## किमधिगतम् ।

| पठनप्रवर्त्तनानि । | स्वांशीकृतम् । | भागिकतया स्वांशीकृतम् । | प्रगतये प्रयत्नः करणीयः। |
|---|---|---|---|
| अन्वयलेखनं कृतम् । | | | |
| आशयलेखनं कृतम् । | | | |
| अलङ्कारस्य लक्षणसमन्वयपूर्वकं समर्थनं कृतम् । | | | |
| गणनिर्णयपूर्वकं वृत्तसमर्थनं कृतम् । | | | |
|ताललयसमन्वितम् आलापनं शब्दमुद्रणं च कृतम् । | | | |
| पट्टिकापूरणं कृतम् । | | | |
| जीवनचरितरूपरेखायाः विपुलीकरणं कृतम् । | | | |

**धार्मिकजीवनम् अनुपेक्षणीयम्। आगामिनि पाठे श्रीनारायणगुरोः धर्मोपदेशानधिकृत्य पठामः।**

## तृतीयम् एककम्

# नैतिकता ।



### आमुखम् ।

भारतस्य संविधाने अन्तर्भूतानि मूल्यानि भवन्ति जनतन्त्रता (जनाधिपत्यं), समत्वं, धार्मिकता, सर्वधर्मसमभावना, स्वातन्त्र्यं, न्यायः, समग्रता, शास्त्रावबोधः च । अस्मिन्नेकके समत्वं शास्त्रावबोधः इति विषयद्वयमधिकृत्य यथाक्रमं 'कर्मयोगी श्रीनारायणगुरुः', 'जनहिताय' इति पाठद्वयं समाकलितं वर्तते ।

पञ्चमः पाठः

# कर्मयोगी श्रीनारायणगुरुः।




**पाठप्रवेशः।**

चित्रे के के पत्रालयमुद्राङ्काः प्रदर्शिताः?
पत्रालयमुद्राङ्कानां सञ्चयाभिरुचिः केषाम् अस्ति ?
पत्रालयमुद्राङ्केषु चित्रितः प्रथमः केरलीयः कः इति जानासि वा ?

## आमुखम् ।

### श्रीनारायणगुरुः।



| | | |
|---|---|---|
| जननम् | - | 1855 आगस्त् 28, चेम्पष़न्ति, तिरुवनन्तपुरम् । |
| पितरौ | - | माटनाशान् कुट्टियम्मा च । |
| प्रशस्तिः | - | दार्शनिकः, कविः, समाजपरिष्कर्ता च । |
| संस्कृतकृतयः | - | दर्शनमाला, श्लोकत्रयी, निर्वृतिपञ्चकम्, ब्रह्मविद्यापञ्चकम् इत्यादयः। |
| कैरलीकृतयः | - | दैवदशकम्,आत्मोपदेशशतकम्, जीवकारुण्यपञ्चकम्, अनुकम्पादशकम्, अद्वैतजीवितम् इत्यादयः। |
| श्रद्धेयाः सन्देशाः | - | मा पृच्छ मा वद मा चिन्तय जातिम् ।<br>मद्यं विषमेव तन्मा पच मा पिब मा यच्छ ।<br>सम्मिलन्तु सम्मिलन्तु योग्यतां समार्जयन्तु ।<br>विद्यया प्रबुद्धतां यान्तु मानवास्सदा । |
| देहवियोगः | - | 1928 सेप्तंबर् 20 शिवगिरिः, तिरुवनन्तपुरम् । |

**को नाम देशः का जातिः**
**प्रवृत्तिः का कियद्वयः ।**
**इत्यादिवादोपरति -**
**र्यस्य तस्यैव निर्वृतिः ॥**

(निर्वृतिपञ्चकम्, १)

“ एकस्य नाम, देशः, प्रवृत्तिः, जातिः, वयः इत्यादिभेदान् अविगणय्य स्वस्मिन् परस्मिन् च समभावनां यः करोति सः एव परमानन्दम् अनुभवति” ।

“ एका जातिः एको धर्मः एकम् दैवतम् मनुष्याणाम् ” - इत्येवमुद्घोषयन् सर्वेष्वपि जन्तुषु आत्मभावनां कुर्वन् कश्चिन्महागुरुः अस्माकं देशे व्यराजत । साक्षात् श्रीनारायणगुरुः एव सः महात्मा ।

गुरोः जीवनकाले केरलेषु सर्वत्र जातिचिन्ता प्रभूता प्रचलिता च आसीत्। तया जातिचिन्तया व्रणितहृदयः गुरुः तस्याः उन्मूलनं कर्तुम् ऐच्छत्। आत्मनः लक्ष्यं साक्षात्कर्तुं सः आत्मीयं भौतिकं च मार्गं स्वीचकार। तदर्थं देशस्य विविधभागेषु युगपदेव देवालयान् विद्यालयान् च निर्मितवान्।

१९२१ तमे वर्षे आलुवाजनपदे तस्य निर्देशानुसारं सर्वमतसम्मेलनं प्राचलत्। "सर्वेषां धर्माणां परमं लक्ष्यम् एकमेव" इति उद्बोधयितुम् अनेन मेलनेन गुरुः अयतत। " न विवादाय, न विजयाय, किन्तु ज्ञातुं ज्ञापयितुमेव" सम्मेलनमिदम् इति उदघोषयत्। क्रमेण देशविदेशेषु प्रसारितां गुरोःवाणीं निशम्य अनेके प्रमुखाः तं द्रष्टुम् केरलान् आगताः। तेषु प्रमुखौ स्तः राष्ट्रपिता महात्मागान्धी, महाकविः रवीन्द्रनाथटागोर् च। 'नानृषिः कविः' इति प्रथाम् अन्वर्थीकृत्य सः संस्कृतम्, मलयालम्, तमिल् इति भाषासु ६४ ग्रन्थान् व्यरचयत्। समत्वम्, साहोदर्यम्, मानविकता, ऐकमत्यम् इत्यादिषु विषयेषु गुरोः समग्रं दर्शनम् अभूतपूर्वमेव। प्रसिद्धेन फ्रेञ्च् लेखकेन रोमैन् रोलन्ड् महाशयेन गुरवे प्रदत्तं 'कर्मयोगी ' इति विशेषणं सर्वथा अन्वर्थं कुर्वन् स महात्मा जनहृदयेषु सदा विद्योतते।



**पदच्छेदः।**

सर्वेष्वपि - सर्वेषु + अपि।
कश्चिन्महागुरुः - कश्चित् + महागुरुः।
इत्येवमुद्घोषयन् - इति + एवम् + उद्घोषयन्।
नानृषिः - न + अनृषि :।

**विग्रहः।**

महाकविः - महान् च असौ कविः च।
अनृषिः - न ऋषिः।
महात्मा - महान् च असौ आत्मा च।
देशविदेशेषु - देशः च विदेशा : च देशविदेशाः, तेषु।
जनहृदयेषु - जनानां हृदयानि जनहृदयानि, तेषु।

**धातुपरिचयः।**

| | | |
|---|---|---|
| अयतत | - | यत् धातोः आ.प. लङ् प्र.पु. ए.व. । |
| व्यरचयत् | - | वि+ रच् धातोः प.प. लङ् प्र. पु. ए. व.। |
| ऐच्छत् | - | इष् धातोः प.प. लङ् प्र. पु. ए. व.। |
| प्राचलत् | - | प्र+चल् धातोः प.प. लङ् प्र. पु. ए. व.। |
| विद्योतते | - | वि + द्युत धातोः आ.प. लट् प्र. पु. ए. व. । |

## व्याकरणकार्यम् ।

### पञ्चमी विभक्तिः ।

**बालः यानात् पतति ।**

**ध्रुवमपायेऽपादानम् । (१ - ४ - २४)**

**अपायो विश्लेषः। तस्मिन् साध्ये यद् ध्रुवम् अवधिभूतं कारकं तद् अपादानं स्यात् ।**

**टिप्पणिः -**

ध्रुवम् - द्वयोः संयुक्तयोः अन्यतरस्य चलनात् विश्लेषः इति स्थितिः। तत्र तादृशचलनस्य अनाश्रयभूतम् अवधिः ध्रुवम् । यथा वृक्षात् फलं पतति इत्यत्र वृक्षः ध्रुवम् । तदेव अपादानम् ।

**नारायणः ग्रामात् आयाति ।**

**अपादाने पञ्चमी । (२ - ३ - २८)**

**अपादाने पञ्चमी विभक्तिः भवति इत्यर्थः ।**

रामः ग्रामाद् आयाति । भटः धावतः अश्वात् पतति । वृक्षात् फलं पतति ।

**श्रीनारायणस्य प्रभाषणं श्रुत्वा जनाः अधर्मात् विरमन्ति ।**

**जुगुप्साविरामप्रमादार्थानामुपसंख्यानम्' । (वार्तिकम्)**

**जुगुप्साविषयस्य, विरामविषयस्य, प्रमादविषयस्य च अपादानसंज्ञा भवति ।**

पापात् जुगुप्सते । अधर्मात् विरमति । धर्मात् प्रमाद्यति ।

'कश्चित्कान्ताविरहगुरुणा स्वाधिकारात्प्रमत्तः' इति मेघसन्देशे ।

**श्रीनारायणः जनान् सङ्घर्षात् त्रायते ।**

**भीत्रार्थानाम् भयहेतुः । (१ - ४ - २५)**

**भयार्थानां त्राणार्थानां च धातूनां प्रयोगे भयहेतुरपादानं स्यात् ।** चोरात् बिभेति ।

चोरात् त्रायते। व्याधात् रक्षति। सर्पात् बिभेति। मारुतपुत्रात् तस्मात् तत्रास (चम्पूरामायणे सीतादर्शनम्)। गुरोः कृशानुप्रतिमात् बिभेषि - (रघुवंशः)।

**विद्यायाः विना नान्या गतिः।**

**पृथग्विनानानाभिस्तृतीयाऽन्यतरस्याम्। (२ - ३ - ३२)**

**पृथक्, विना, नाना एभिः योगे तृतीया, पञ्चमी, द्वितीया वा स्यात्।**
पृथक् रामेण, रामात्, रामं वा। एवं विना नाना च।
विना विद्यया। विना विद्यायाः। विना विद्याम्।
वृद्धत्वं जरसा विना। (रघुवंशः)।
नाना नारीं निष्फला लोकयात्रा।
विना गोरसं को रसो भोजनानाम्।
कृष्णात् विना नान्या गतिः।

**ग्रामात् आरात् वनम् अस्ति।**

**अन्यारादितरर्तेदिक्शब्दाञ्चूत्तरपदाजाहियुक्ते। (२ - ३ - २९)**

अन्य, आरात्, इतर, ऋते, दिक्शब्द, अञ्चूत्तरपद, आच्, आहि - एतैः योगे पञ्चमी स्यात्। अन्य - इत्यर्थग्रहणम्। इतरग्रहणं प्रपञ्चार्थम्। अन्यो भिन्नः इतरो वा कृष्णात्। आराद्वनात्। ऋते कृष्णात्। पूर्वो ग्रामात्। चैत्रात्पूर्वः फाल्गुनः। प्राक् प्रत्यग्वा ग्रामात्। आच् - दक्षिणा ग्रामात्। आहि - दक्षिणाहि ग्रामात्। संस्कृतात् ऋते संस्कृतिः न। ग्रामात् उत्तरः विद्यालयः। वैशाखात् पूर्वः चैत्रः। अञ्चुधातुः उत्तरपदं यस्य सः अञ्चूत्तरपदः, प्रागादिदिक्शब्दः। प्राक् प्रत्यग्वा ग्रामात्।

**आहिमालयात् भारतदेशः। (अभिविधिः)**
**आहिमालयात् चीनादेशः। (मर्यादा)**

**आङ् मर्यादावचने। (१ - ४ - ८९)**

**आङ् मर्यादायां कर्मप्रवचनीयसंज्ञः स्यात्।** अत्र अभिविधिरपि गृह्यते। सीमां विना कथनं मर्यादा। अन्तर्भाव्य कथनम् अभिविधिः।

**आपरितोषाद्विदुषाम्। आब्रह्मभुवनाल्लोकाः।** (भगवद्गीता)

**पञ्चम्यपाङ्परिभिः। (२ - ३ - १०)**

**अप, आङ्, परि एतैः कर्मप्रवचनीयैर्योगे पञ्चमी स्यात्।** अप हरेः। परि हरेः संसारः। हरिं वर्जयित्वा संसारः इत्यर्थः। आ मुक्तेः संसारः। आ सकलात् ब्रह्म।

## षष्ठी विभक्तिः ।

**गुरोः जीवनकालः।**
**सर्वेषां लक्ष्यम् ।**

**षष्ठी शेषे । (२ - ३ - ५०)**

**कारकप्रातिपदिकार्थव्यतिरिक्तः स्वस्वामिभावादिसम्बन्धः शेषः । तत्र षष्ठी स्यात् ।**

उक्तादन्यः शेषः । कर्मकर्तृकरणसम्प्रदानापादानाधिकरणानि उक्तानि । प्रातिपदिकार्थश्च उक्तः। कः एतेभ्यः षड्भ्यः अतिरिक्तः अस्ति इति चेत् स्वस्वामिभावः, जन्यजनकभावः, अवयवावयविभावः इत्यादयः सम्बन्धाः ।

यथा राज्ञः पुरुषः । राजसम्बन्धी पुरुषः इत्यर्थः ।
दशरथस्य पुत्रः । दशरथसम्बन्धी पुत्र इति ।

**अन्नस्य हेतोः वसति ।**

**षष्ठी हेतुप्रयोगे । (२ - ३ - २६)**

**हेतुशब्दप्रयोगे हेतौ द्योत्ये षष्ठी स्यात् ।**

'अल्पस्य हेतोः बहु हातुमिच्छन्'। (रघुवंशम्)
'अपि त्रैलोक्यराज्यस्य हेतोः किं नु महीकृते' । (भगवद्गीता)

**नारायणगुरोः कृतिः दर्शनमाला । (कर्तरि षष्ठी)**
**दर्शनमालायाः कर्ता नारायणगुरुः। (कर्मणि षष्ठी)**

**कर्तृकर्मणोः कृति । (२ - ३ - ६५)**

**कृद्योगे कर्तरि कर्मणि च षष्ठी स्यात् ।**

कालिदासस्य कृतिः अभिज्ञानशाकुन्तलम् । अभिज्ञानशाकुन्तलस्य कर्ता कालिदासः।

## पठनप्रवर्तनानि ।

**पाठभागं सङ्घे चर्चित्वा आशयं स्वांशीकृत्य श्रीनारायणगुरोः योगदानमधिकृत्य लघूपन्यासं रचयतु ।**

श्रद्धेयाः अंशाः -

- सङ्घे चर्चा ।
- आशयरूपीकरणम् ।
- लघूपन्यासरचना ।

**आमुखं पठित्वा श्रीनारायणगुरुमधिकृत्य संक्षिप्य लिखतु ।**

श्रद्धेयांशाः -

- आमुखपठनम् ।
- सङ्घचर्चा ।
- पूर्णवाक्यैः लेखनम् ।

**अनुबन्धे दत्तानां पद्यानां विशकलनं कृत्वा श्रीनारायणगुरोः दर्शनमधिकृत्य टिप्पणिं लिखतु ।**

श्रद्धेयांशाः –

❖ अनुबन्धपठनम् । ❖ सङ्घचर्चा । ❖ टिप्पणीलेखनम् ।

**अधोनिर्दिष्टानां महात्मनां जीवनचरितेभ्यः एकं चित्वा टिप्पणिं लिखतु । प्रभाषणरूपेण कक्ष्यायाम् अवतारयतु ।**

क) अय्यन् कालिः। ख) वाग्भटानन्दः। ग) वक्कम् मुहम्मद् अब्दुल् खादर् मौलविः।

श्रद्धेयाः अंशाः -

❖ ग्रन्थालयप्रवर्तनम् । ❖ सङ्घचर्चा । ❖ टिप्पणीलेखनम् । ❖ प्रभाषणम् ।

**कक्ष्यायां चर्चित्वा अधोरेखाङ्कितानां विभक्तीनां प्रयोगसाधुतां सप्रमाणं निर्णयतु । लिखित्वा अवतारयतु ।**

- चोरात् बिभेति ।
- राज्ञः पुरुषः।
- बालः ग्रामात् आयाति ।
- कृष्णात् विना नान्या गतिः।
- श्रीहर्षस्य कृतिः नैषधीयम् ।
- नैषधीयस्य कर्ता श्रीहर्षः।
- आहिमालयात् भारतदेशः।
- आरात् वनात् ।
- अल्पस्य हेतोः।
- आसकलात् ब्रह्म ।
- अधर्मात् विरमति ।
- उद्याने पाटलात् ऋते अन्यत् सर्वमस्ति ।
- आपरितोषात् विदुषां न साधु मन्ये प्रयोगविज्ञानम् ।

श्रद्धेयाः अंशाः -

❖ व्याकरणकार्यस्य पठनम् । ❖ सङ्घे स्थित्वा चर्चा ।
❖ रेखाङ्कितपदानां ग्रहणम् । ❖ सूत्रनिर्धारणं विशदीकरणं च ।

## अभ्यासपत्रिका ।

**क. उचितविभक्तिरूपेण एकैकमपि वाक्यं पूरयतु ।**

१. वानरः -------- कूर्दति । (वृक्षः)
२. छात्राः ------- बहिः आगच्छन्ति । (कक्ष्या)
३. मनुजः------- बिभेति । (वन्यमृगः)
४. -------- उत्तरः विद्यालयः। (ग्रामः)
५. विना ------- का गतिः। (विद्या)
६. -------- कृतिः अभिज्ञानशाकुन्तलम् । (कालिदासः)
७. ---------- हेतोः वसति । (अन्नम्)

श्रद्धेयाः अंशाः -

- ❖ व्याकरणकार्यस्य पठनम् । ❖ सङ्घे स्थित्वा चर्चा ।
- ❖ विभक्तिज्ञानम् । ❖ उचितविभक्तिरूपेण पूरणम् ।

## अनुबन्धः।

**क.**

**को नाम देशः का जातिः**
**प्रवृत्तिः का कियद्वयः ।**
**इत्यादिवादोपरति-**
**र्यस्य तस्यैव निर्वृतिः ॥**

(निर्वृतिपञ्चकम् – श्रीनारायणगुरुः, श्लोकसंख्या -१)

अन्वयः - कः नाम देशः? का जातिः? का प्रवृत्तिः? कियत् वयः? इत्यादिवादोपरतिः यस्य तस्य एव निर्वृतिः ।

ഏതു നാട്? എന്തു ജാതി? എന്തു ജോലി? വയസ്സെത്രയായി? എന്നു തുടങ്ങിയ വാദങ്ങൾ ആർക്കാണോ ഇല്ലാതായിരിക്കുന്നത് അവനുതന്നെയാണ് നിർവൃതി. സാധാരണ ഒരാളെ കണ്ടുമുട്ടുമ്പോൾ 'ലോഹ്യം' പറച്ചിൽ എന്ന നിലയിൽ ചോദിക്കാറുള്ള ചോദ്യങ്ങളാണിവ. സന്യസ്തചിത്തൻ ഇവയെക്കുറിച്ചൊന്നും അന്വേഷിക്കുന്നില്ല.

(കടപ്പാട്)

**ख.**

**ജാതിഭേദം മതദ്വേഷം ഏതുമില്ലാതെ സർവ്വരും**
**സോദരത്വേന വാഴുന്ന മാതൃകാസ്ഥാനമാമിത്.**

(ഗുരുസന്ദേശം, അരുവിപ്പുറംക്ഷേത്രം)

1888-ൽ അരുവിപ്പുറം പ്രതിഷ്ഠ കഴിഞ്ഞപ്പോൾ അവിടെ ചുവരിൽ എഴുതിവച്ചത്. ജാതിഭേദം - ജാതിയുടെ പേരിലുള്ള വ്യത്യാസം. മതദ്വേഷം - മതങ്ങൾ മത്സരിച്ചും കലഹിച്ചും ഉണ്ടാകുന്ന വിദ്വേഷം. ഏതുമില്ലാതെ - യാതൊന്നുമില്ലാതെ, സർവരും - എല്ലാവരും. സോദരത്വേന - ഉടപ്പിറന്നവർ എന്നനിലയിൽ. വാഴുന്ന - ജീവിക്കുന്ന മാതൃകാസ്ഥാനമാമിത് - അനുകരണയോഗ്യമായ സ്ഥലമാണിത്.

(കടപ്പാട്)

**ग.**

**മനുഷ്യാണാം മനുഷ്യത്വം**
**ജാതിർഗോത്വം ഗവാം യഥാ**
**നൈവ സാ ബ്രാഹ്മണത്വാദിർ -**
**യൗഗികത്വാദ്വിമൃശ്യതാം.**

(ജാതിനിർണയം, ശ്ലോകസംഖ്യാ -1)

ഗോക്കൾക്ക് ഗോത്വമെന്നതുപോലെ മനുഷ്യർക്ക് മനുഷ്യത്വമാണ് ജാതി. ബ്രാഹ്മണത്വം മുതലായവ മനുഷ്യന്റെ ജാതിയല്ല. ജാതി എന്ന പദത്തിന്റെ യൗഗികാർത്ഥം അടിസ്ഥാനമാക്കി ഇതു വിമർശിച്ചറിഞ്ഞാലും.

(കടപ്പാട്)

ഘ.

**അവനിവനെന്നറിയുന്നതൊക്കെയോർത്താ-**
**ലവനിയിലാദിമമായൊരാത്മരൂപം**
**അവനവനാത്മസുഖത്തിനാചരിക്കു-**
**ന്നവയപരന്നു സുഖത്തിനായ് വരേണം.**

(ആത്മോപദേശശതകം, ശ്രീനാരായണഗുരു, ശ്ലോകസംഖ്യ – 24)

അവൻ ഇവൻ എന്നറിയുന്നതൊക്കെ – അവൻ എന്നും ഇവൻ എന്നും ആളുകളെ വേർതിരിച്ച് പറയുന്നതെല്ലാം, ഓർത്താൽ - ആലോചിച്ച് നോക്കിയാൽ, അവനിയിൽ - ഭൂമിയിൽ, ആദിമമായ – തുടക്കം മുതലുള്ള, ഒരാത്മരൂപം – ആത്മാവിന്റെ രൂപം തന്നെയാണ്, അവന്റെ സത്തയും ഇവന്റെ സത്തയും ആദിമമായ ആത്മരൂപം തന്നെയെന്ന് തത്ത്വം. അവനവൻ - ഓരോരുത്തനും, ആത്മസുഖത്തിന് ആചരിക്കുന്നവ – സ്വന്തം സുഖത്തിനുവേണ്ടി ചെയ്യുന്ന കർമ്മങ്ങൾ, അപരന്ന് – അന്യന്ന്, സുഖത്തിനായ് വരേണം – ആനന്ദം ഉണ്ടാക്കുന്നതായ് തീരണം.

ആലോചിച്ചു നോക്കിയാൽ അവൻ ഇവൻ എന്ന വ്യവഹാരത്തിന് എല്ലാം അടിസ്ഥാനതത്ത്വമായിട്ടുള്ളത് ആദിമമായ ഒരു ആത്മരൂപമാണെന്ന് മനസ്സിലാകും. അതുകൊണ്ട് ഓരോരുത്തനും അവന്റെ സുഖത്തിനു വേണ്ടി ചെയ്യുന്ന കർമ്മങ്ങൾ അന്യന്റെ സുഖത്തിനുതകുന്നതാകണം. (കടപ്പാട്)

ങ.

**പല മതസാരവുമേകമെന്നു പാരാ-**
**തുലകിലൊരാനയിലന്ധരെന്ന പോലെ**
**പലവിധയുക്തി പറഞ്ഞു പാമരന്മാ-**
**രലവതു കണ്ടലയാതമർന്നിടേണം.**

(ആത്മോപദേശശതകം, ശ്ലോകസംഖ്യ -44)

പല മതസാരവുമേകം - വിവിധമതങ്ങളുടെ കാതലായ അംശം ഒന്നുതന്നെയാണ്. എന്നു പാരാതെ - എന്നു മനസ്സിലാക്കാതെ. ഉലകിൽ - ലോകത്തിൽ. ഒരാനയിൽ അന്ധരെന്നപോലെ - (ആനയുടെ സ്വരൂപം മനസ്സിലാക്കാൻ പോയ കുരുടന്മാരെപ്പോലെ) ആനയുടെ ഓരോ അവയവം തൊട്ടുനോക്കിയ ഓരോ കുരുടനും അയാളുടെ അനുഭവത്തിനനുസരിച്ച് ആന കുന്തം പോലെയാണ്, അല്ല ചുമരു പോലെയാണ്, അല്ല തൂണുപോലെയാണ് എന്നും മറ്റും വാദിച്ചപോലെ. പലവിധയുക്തി പറഞ്ഞു - പലതരത്തിലുള്ള വാദമുഖങ്ങൾ യുക്തിപൂർവം ഉന്നയിച്ച്. പാമരന്മാർ - അജ്ഞാനികൾ. അലവതുകണ്ട് - പണിപ്പെടുന്നതു കണ്ട്. അലയാതമർന്നിടേണം - അവരെപ്പോലെ അലയാതെ സ്വസ്ഥരായി സ്ഥിതിചെയ്യണം.

തന്റെ മതമാണ് ഏറ്റവും നല്ലതെന്ന് സ്ഥാപിക്കാൻ ഓരോരുത്തനും പലതരം യുക്തികൾ ഉന്നയിക്കുന്നു. പാക്ഷികമായ വാസ്തവം അവയിൽ ഉള്ളതുകൊണ്ട് ശരിയാണെന്ന് തോന്നുന്നു. സമഗ്രദർശനത്തിൽ മാത്രം യുക്തിഭംഗം അറിയുന്നു. ഓരോ മതവും മറ്റു മതത്തിൽനിന്ന് കാതലായ അംശത്തിൽ ഭിന്നമല്ല എന്ന് മനസ്സിലാക്കിയാൽ വാദങ്ങളെല്ലാം അടങ്ങും. ഒരു മതത്തിലെ തത്ത്വം മറ്റൊരു മതക്കാരനു നിന്ദ്യമായി തോന്നും, മറിച്ചും സംഭവിക്കും. രണ്ടിന്റെയും ആന്തരതത്ത്വം അറിയുന്നതുവരെ.

(കടപ്പാട്)

## शब्दकोशः ।

| संस्कृतम् | अर्थः | कैरली | आङ्गलम् |
|---|---|---|---|
| प्रभूता | अत्यधिका | ധാരാളം | Abundant |
| व्रणितहृदयः | व्यथितचित्तः | മുറിവേറ്റഹൃദയത്തോടു കൂടിയവൻ | Brokenhearted |
| उन्मूलनम् | मूलतःनिर्मार्जनम् | വേരോടുകൂടി പറിച്ചുകളയൽ | Uprooting |
| व्यराजत | अशोभत | ശോഭിച്ചു | Shone |
| ऐच्छत् | अभिलषति स्म | ആഗ്രഹിച്ചു | Desired |
| अयतत | प्रयत्नम् अकरोत् | പ്രയത്നിച്ചു | Tried / Attempted |
| प्रसारिता | विस्तृता | വ്യാപിച്ച | Spread |
| प्रथा | प्रसिद्धिः | പ്രസിദ്ധി | Fame |
| अन्वर्थम् | अर्थसहितम् | അർത്ഥവത്തായ | Meaningful |
| मेलनम् | संयोजनम् | സമ്മേളനം | Conference |

## किमधिगतम् ।

| पठनप्रवर्त्तनानि । | स्वांशीकृतम् । | भागिकतया स्वांशीकृतम् । | प्रगतये प्रयत्नः करणीयः। |
|---|---|---|---|
| लघूपन्यासरचना कृता । | | | |
| श्रीनारायणगुरुमधिकृत्य संक्षिप्य लेखनं कृतम् । | | | |
| श्रीनारायणगुरोः दर्शनमधिकृत्य टिप्पणीलेखनं कृतम् । | | | |
| प्रभाषणावतरणं कृतम् । | | | |
| विभक्तीनां प्रयोगसाधुतामधिकृत्य टिप्पणीलेखनं कृतम् । | | | |
| अभ्यासपत्रिकायाः पूरणं कृतम् । | | | |

**प्रजानीतिः तदधिष्ठितं साहित्यं च प्राचीनकालादारभ्य द्रष्टुं शक्यते ।**
**आगामिनि पाठे चाणक्यस्य प्रजानीतिमनुसृत्य परिकल्पनानि पठामः।**



## षष्ठः पाठः

# जनहिताय ।

### पाठप्रवेशः ।

(भारतीयन्यायसंहितामधिकृत्य पत्रवार्तां दृष्ट्वा पितृपुत्रयोर्मिथः प्रवृत्तम् एकं सम्भाषणम् ।)

**पुत्रः** - पितः ! किं नाम भारतीयसंविधानम् ?

**पिता** - भारतस्य प्रजातन्त्रसम्प्रदायस्य आधारो भवति भारतीयसंविधानम् । तस्य रचनायां प्रथमतया स्मरणीयः भवति डॉ. भीमरावु अम्बेद्कर् महाशयः । अत एव सः भारतीयसंविधानस्य शिल्पी इति प्रसिद्धः।

**पुत्रः** - ततः पूर्वम् एतादृशविषयेषु कापि व्यवस्था नासीत् वा ?

**पिता** - आसीदेव । इतिहासपुराणादिष्वपि न्यायव्यवस्थाविषयाः प्रतिपादिताः दृश्यन्ते । अस्माकं पूर्वैः विविधविज्ञानशाखासु एतद्विषयकाः प्रसिद्धाः अनेके ग्रन्थाः विरचिताः सन्ति । एतेषु कौटिल्यस्य अर्थशास्त्रं प्रमुखं प्रसिद्धम् च ।

एतस्मात् ग्रन्थात् कानिचन उदाहरणानि पश्यामः ।





## आमुखम् ।

मौर्यवंशस्थापकस्य चन्द्रगुप्तमौर्यस्य सचिवप्रमुखः आसीत् कौटिल्यः इति प्रसिद्धः चाणक्यः। तेन विरचितः ग्रन्थः भवति अर्थशास्त्रम् । ग्रन्थेऽस्मिन् पञ्चदश अधिकरणानि सन्ति । तानि पुनः अध्यायरूपेण विभक्तानि । आहत्य षट्सहस्राणि श्लोकाश्च । अस्मिन् ग्रन्थे राष्ट्रशासनसंबन्धिनः आर्थिकनीतिसम्बन्धिनः च सिद्धान्ताः द्रष्टुं शक्यन्ते । एवं भारतीयसंविधानस्य न्यायव्यवस्था, प्रजासंरक्षणं, धर्मपालनम् इत्यादिविषयाः ग्रन्थेऽस्मिन् मुख्यतया प्रतिपादिताः। अस्मिन् पाठे प्रजाक्षेमपरिपालनाय राज्ञा कथम् आसूत्रणं कर्तव्यम् इति विषयप्रतिपादकाः अर्थशास्त्रादुद्धृताः त्रयः श्लोकाः समायोजिताः।

**१. प्रजासुखे सुखं राज्ञः प्रजानां च हिते हितम् ।**
**नात्मप्रियं हितं राज्ञः प्रजानां तु प्रियं हितम् ॥**

(अर्थशास्त्रम् १-१६-५)

**व्याख्या ।**

प्रजासुखे इति - प्रजासुखे सति राज्ञः सुखम् अस्ति । प्रजानां हिते च सति राज्ञो हितम् अस्ति । राज्ञः आत्मप्रियं हितं न भवेत्, किं तर्हि? प्रजानां प्रियं तु हितम् । प्रजानां प्रियमेव हितं भवेत् इत्यर्थः।

**अन्वयः।**

प्रजासुखे राज्ञः सुखं ( भवति) । प्रजानां हिते (राज्ञः) हितम् च ( भवति) । राज्ञः अत्मप्रियं न हितम्। प्रजानां प्रियं तु हितम् (भवति ) ।

**भावार्थः ।**

प्रजानां यत् सुखं तदेव राज्ञः सुखम् । एवमेव प्रजानां यत् हितं तदेव राज्ञः अपि हितम् । राजा स्वस्य प्रियं हितकरमिति न मन्येत । प्रजानां प्रियमेव राज्ञः अपि हितकरं भवेत् । (भाषानुवादमपि पश्यतु। पु.सं. ९३)

**२. तस्मान्नित्योत्थितो राजा कुर्यादर्थानुशासनम् ।**
**अर्थस्य मूलमुत्थानमनर्थस्य विपर्ययः ॥**

(अर्थशास्त्रम् १-१६-६)

**व्याख्या ।**

तस्मादिति - तस्माद् उक्तात् कारणात्, राजा नित्योत्थितः नित्योद्योगी सन् अर्थसम्पादनं विनियोगं च कुर्यात् । उत्थानम् उद्यमः, अर्थस्य मूलं सिद्ध्युपायः, विपर्ययः अनुत्थानम् अनर्थस्य मूलम् ।

**अन्वयः।**

तस्मात् नित्योत्थितः राजा अर्थानुशासनम् कुर्यात् । उत्थानम् अर्थस्य मूलम् । विपर्ययः अनर्थस्य (च) मूलम् ।

**भावार्थः।**

तस्मात् कारणात् प्रजानां सुखजीवनार्थं राजा सदा परिश्रमशाली भवेत्। परिश्रमं कृत्वा अर्थस्य (धनस्य) परिपालनं कुर्यात् । सम्पदः आधारः परिश्रमः एव । परिश्रमाभावे अनर्थः एव फलम् । (भाषानुवादमपि पश्यतु। पु.सं. ९३)

**३. अनुत्थाने ध्रुवो नाशः प्राप्तस्यानागतस्य च ।**
**प्राप्यते फलमुत्थानाल्लभते चार्थसम्पदम् ॥**

(अर्थशास्त्रम् १-१६-७)

**व्याख्या ।**

अनुत्थाने इति - अनुत्थाने आलस्यात् उद्योगाकरणे, प्राप्तस्य पूर्वसिद्धस्य, अनागतस्य प्राप्यस्य अर्थस्य, नाशः, ध्रुवः निश्चितः । उत्थानात् फलं प्राप्यते, सद्यः अर्थसम्पदं लभते च । अर्थस्य प्राप्तस्य रक्षणेन अप्राप्तस्य प्राप्त्या च समृद्धिं प्राप्नोति । उत्थानस्यैवं त्रैकाल्यहितत्वं समर्थितम् ।

**अन्वयः ।**

अनुत्थाने प्राप्तस्य अनागतस्य च नाशः ध्रुवः । उत्थानात् फलं प्राप्यते अर्थसम्पदं लभते च ।

**भावार्थः।**

यदि आलस्यात् राजा परिश्रमं न करोति तर्हि आगतस्य अनागतस्य च धनस्य नाश: निश्चितः भवति । परिश्रमात् सद्य एव फलं प्राप्यते । एवं प्राप्तस्य धनस्य रक्षणेन अप्राप्तस्य धनस्य प्राप्त्या च समृद्धिं प्राप्नोति । (भाषानुवादमपि पश्यतु। पु.सं. ९३)

**पदच्छेदः।**

| | | |
|---|---|---|
| इतिहासपुराणादिष्वपि | - | इतिहासपुराणादिषु + अपि । |
| ग्रन्थेऽस्मिन् | - | ग्रन्थे + अस्मिन् । |
| अर्थशास्त्रादुद्धृताः | - | अर्थशास्त्रात् + उद्धृताः। |
| नात्मप्रियम् | - | न + आत्मप्रियम् । |
| तस्मान्नित्योत्थितः | - | तस्मात् + नित्योत्थितः। |

कुर्यादर्थानुशासनम् - कुर्यात् + अर्थानुशासनम्।
प्राप्तस्यानागतस्य - प्राप्तस्य + अनागतस्य।
फलमुत्थानाल्लभते - फलम् + उत्थानात् + लभते।
चार्थसम्पदम् - च + अर्थसम्पदम्।

**विग्रहः।**

अर्थशास्त्रम् - अर्थस्य शास्त्रम्।
आत्मप्रियम् - आत्मनः प्रियम्।
अर्थानुशासनम् - अर्थस्य अनुशासनम्।
अर्थसम्पदम् - अर्थस्य सम्पत् अर्थसम्पत् ताम् / अर्थ एव सम्पत्, ताम्।
सिद्ध्युपायः - सिद्धेः उपायः।

**विभक्तिपरिचयः।**

राज्ञः - नकारान्तः पुल्लिङ्गः'राजन्' शब्दः षष्ठी ए. व.।
राजा - नकारान्तः पुल्लिङ्गः' राजन्' शब्दः प्रथमा ए. व.।

**धातुपरिचयः।**

कुर्यात् - कृञ् धातोः प.प. विधिलिङ् प्रथमा ए. व.।
प्राप्यते - प्रा +आप्- कर्मणि प्रयोगः आ. प. , लट् प्र.पु.ए. व.।
मन्येत - मन् धातोः आ. प. विधिलिङ् प्र.पु.ए.व.।
दृश्यन्ते - दृश् धातोः कर्मणि आ. प. लट् प्र.पु.ब.व.।

## व्याकरणकार्यम्।

**सप्तमी विभक्तिः।**

**अर्थशास्त्रे संविधानविषयाः। पाठे त्रयः श्लोकाः।**

**आधारोऽधिकरणम्। (१ - ४ - ४५)**

**कर्तृकर्मद्वारा तन्निष्ठक्रियायाः आधारः कारकमधिकरणसंज्ञं स्यात्।**

**पाचकः स्थाल्यां पचति।**

**सप्तम्यधिकरणे च। (२ - ३ - ३६)**

**अधिकरणे सप्तमी स्यात्। चकारात् दूरान्तिकार्थेभ्यः। आधारः त्रिधा - औपश्लेषिकः वैषयिकः अभिव्यापकश्च।**

उदाः कटे उपविशति। अत्र सम्बन्धः संयोगः। अतः अयम् औपश्लेषिकः आधारः।
मोक्षे इच्छास्ति। वैषयिकाधारः।
सर्वस्मिन्नात्मा अस्ति। अभिव्यापकः।
वनस्य दूरे, अन्तिके वा।

**टिप्पणिः -**

औपश्लेषिकः - उपश्लेषकृतः। उपश्लेषः संयोगादिसंबन्धः। अव्याप्यवृत्तिः सम्बन्धः।
वैषयिकः - विषयतासंबन्धकृतः। मातरि स्निह्यति, अहं मम राष्ट्रे स्निह्यामि इत्यादि।
अभिव्यापकः - सकलावयवव्याप्तिकृतः आधारः। व्याप्यवृत्तिः सम्बन्धः। तिले तैलम्। तैलं तिले सर्वत्र अभिव्याप्तम् इत्यर्थः।

➤ **प्रजानां हिते (सति) राज्ञो हितं भवति।**

**यस्य च भावेन भावलक्षणम्। (२ - ३ - ३७)**

**यस्य क्रियया क्रियान्तरं लक्ष्यते ततः सप्तमी स्यात्।** गोषु दुह्यमानासु गतः। अत्र द्वे क्रिये भवतः। तयोः एकस्याः क्रियायाः कालः निर्ज्ञातः भवति। अपरस्याः क्रियायाः कालः अनिर्ज्ञातः च भवति। गवां दोहनक्रियया गमनक्रिया लक्ष्यते। अतः गोशब्दात् सप्तमी।

**टिप्पणिः -**

भावशब्दौ क्रियापर्यायौ। क्रिया च कर्त्राश्रया कर्माश्रया च। कर्माश्रयायाः उदाहरणम् - गोषु इति।

➤ **जनेषु पश्यत्सु चोरः चौर्यं कृतवान्।**

**षष्ठी चानादरे। (२ - ३ - ३८)**

**अनादराधिक्ये भावलक्षणे षष्ठीसप्तम्यौ स्तः।**

रुदति रुदतो वा प्राव्राजीत्। रुदन्तम् पुत्रादिकम् अनादृत्य संन्यस्तवानित्यर्थः। नन्दाः पशव इव हताः पश्यतो राक्षसस्य। (मुद्राराक्षसम्)। पश्यन्तं राक्षसमनादृत्येत्यर्थः।

➤ **प्राचीनसंविधानग्रन्थेषु अर्थशास्त्रं श्रेष्ठम्।**

**यतश्च निर्धारणम्। (२ - ३ - ४१)**

**जातिगुणक्रियासंज्ञाभिः समुदायात् एकदेशस्य पृथक्करणं निर्धारणं यतस्ततः षष्ठीसप्तम्यौ स्तः।** जातिवाचकः - वृक्षः, गौः। गुणवाचकः - शुक्लः, कपिलः। क्रियावाचकः - गच्छन्, धावन्। संज्ञावाचकः - देवदत्तः, चैत्रः।

उदाः - प्राणिनां / प्राणिषु वा मानवः श्रेष्ठः। गवां गोषु वा कृष्णा बहुक्षीरा। गच्छतां गच्छत्सु वा धावन् शीघ्रः। छात्राणां छात्रेषु वा मैत्रः पटुः।

**टिप्पणिः -**

प्राणिनां / प्राणिषु वा मानवः श्रेष्ठः इत्यत्र जात्या पृथक्करणम्।
गवां / गोषु वा कृष्णा बहुक्षीरा इत्यत्र गुणेन पृथक्करणम्।
गच्छतां / गच्छत्सु वा धावन् शीघ्रः इत्यत्र क्रियया पृथक्करणम्।
छात्राणां / छात्रेषु वा मैत्रः पटुः इत्यत्र संज्ञया पृथक्करणम्।

## पठनप्रवर्तनानि ।

### पाठभागं कक्ष्यायाम् उच्चैः वाचयतु ।

श्रद्धेयौ अंशौ -

- ❖ उच्चारणशुद्धिः। ❖ आशयव्यक्तता ।

### पाठभागं संघे चर्चित्वा प्रजापालनम् इति विषये टिप्पणिं लिखतु ।

श्रद्धेयाः अंशाः -

- ❖ सङ्घचर्चा । ❖ आशयस्वांशीकरणम् । ❖ टिप्पणीलेखनम् ।

### 'भरणाधिकारिभिः राष्ट्रधनविनियोगः कथं क्रियेत ?' इति विषये कौटिल्यमतानुसारं कक्ष्यायां संवादं प्रचालयतु , टिप्पणिं च लिखतु ।

श्रद्धेयाः अंशाः -

- ❖ प्रजाहितम् । ❖ राजहितम् । ❖ परिश्रमशीलः ।
- ❖ प्रजासंरक्षणम् । ❖ धनविनियोगः ।

### अधोलिखितानां सूचकानाम् आधारेण राज्यभरणं कथं भवेत् इति विषयमधिकृत्य कक्ष्यायां संवादं प्रचालयतु टिप्पणिं च लिखतु ।

श्रद्धेयाः अंशाः -

- ❖ 'सुशासनम्' इति पाठभागस्य पठनम् । ❖ 'जनहिताय' इति पाठस्य पठनम् ।
- ❖ सन्तुष्टानि राज्यानि इत्याशयानुसारम् आधुनिकाशयानां संयोजनम् ।

### उदाहरणानां विशकलनं कृत्वा सूत्रं निर्धार्य विशदयतु ।

- ◆ प्रजानां हिते सति राज्ञो हितम् भवति । ◆ कटे उपविशति ।
- ◆ जनेषु पश्यत्सु चोरः चौर्यं कृतवान् । ◆ पाठे त्रयः श्लोकाः ।
- ◆ प्राणिनां प्राणिषु वा मानवः श्रेष्ठः ।◆प्राचीनसंविधानग्रन्थेषु अर्थशास्त्रम् श्रेष्ठम् ।

श्रद्धेयाः अंशाः -

- ❖ व्याकरणकार्यस्य पठनम् । ❖ सङ्घे स्थित्वा चर्चा ।
- ❖ सूत्रं निर्धार्य विशदीकरणम् ।

### उदाहरणं पठित्वा 'यदा - तदा' इत्यस्य स्थाने सतिसप्तमी प्रयोगेण वाक्यं परिवर्तयतु ।

उदा - यदा प्रजानां सुखं तदा राज्ञः हितम् भवति ।
प्रजानां सुखे सति राज्ञः हितम् भवति ।

- ◆ यदा बालः आगतः तदा माता तस्मै भोजनम् अदात् ।
- ◆ यदा सूर्यः उदितः तदा कमलानि विकसन्ति स्म ।

श्रद्धेयाः अंशाः -

- ❖ व्याकरणकार्यस्य पठनम्। ❖ सङ्घे स्थित्वा चर्चा।
- ❖ उदाहरणानुसारं वाक्यपरिवर्तनम्।

## अनुबन्धः।

### पाठभागस्थश्लोकानां कैरल्या गद्यानुवादः।

1. ഭരണാധികാരികൾക്ക് തന്റെ പ്രജകളുടെ സന്തോഷത്തിലാണ് സന്തോഷം. ജനങ്ങളുടെ ക്ഷേമത്തിലാണ് അദ്ദേഹത്തിന്റെയും ക്ഷേമം. തനിക്കു ഇഷ്ടമുള്ളതാണ് നല്ലത് എന്നു വിചാരിക്കരുത്. പ്രജകളുടെ താൽപര്യമാണ് ശ്രേഷ്ഠമായിട്ടുള്ളത്.

2. അതുകൊണ്ട് രാജാവ് (ഭരണാധികാരി) പരിശ്രമശാലിയായി സാമ്പത്തികവ്യവസ്ഥ കൈകാര്യം ചെയ്യണം. സാമ്പത്തികകാര്യങ്ങൾ ചിട്ടയോടെ നോക്കി നടത്തണം. സമ്പത്ത് ഉണ്ടാക്കുന്നതിനുള്ള മാർഗ്ഗം പരിശ്രമമാണ്. പരിശ്രമം ഇല്ലെങ്കിൽ സമ്പത്തുണ്ടാകുകയുമില്ല.

3. അലസതകാരണം പരിശ്രമം ചെയ്യില്ലെങ്കിൽ നേടിയതും വരാനിരിക്കുന്നതുമായ സമ്പത്തിന്റെ നാശം നിശ്ചയമാണ്. പരിശ്രമിച്ചാൽ ഉടനെ ഫലം ഉണ്ടാകുകയും ധനസമ്പത്ത് ലഭിക്കുകയും ചെയ്യും. കൈവശം ഉള്ള ധനം സംരക്ഷിക്കാനും ലഭിക്കാത്ത ധനം ലഭ്യമാക്കാനും കഴിയും.

## शब्दकोशः।

| संस्कृतम् | अर्थः | कैरली | आङ्गलम् |
|---|---|---|---|
| व्यवस्था | संविधानम् | സംവിധാനം | System |
| सचिवः | मन्त्री | മന്ത്രി | Minister |
| नित्योत्थितः | परिश्रमशाली | പരിശ്രമശാലി | Striving |
| उत्थानम् | उद्यमः | പ്രയത്നം | Effort |
| अर्थानुशासनम् | अर्थव्यवहारः/ धनविनियोगः | ധനവിനിയോഗക്രമം | Revenue/ Finance Expenditure |
| अनुत्थानम् | आलस्यम् | അലസത | Laziness |
| ध्रुवः | निश्चितः | തീർച്ചപ്പെട്ടത് | Sure |
| आर्थिकनीतिः | अर्थसम्बन्धो नयः | സാമ്പത്തികനയം | Economic policy |
| हितम् | श्रेयस्करम् | ഹിതമായത് | Good/ Beneficial |
| आत्मप्रियम् | आत्मनः प्रियम् | അവനവന് പ്രിയമായത് | Beloved |
| विपर्ययः | विपरीतम् | വിപരീതം | Opposite |
| अर्थः | धनम् | സമ്പത്ത് | Wealth |
| प्राप्तः | उपलब्धः | ലഭ്യമായത് | Obtained |
| अनागतः | अप्राप्तः | ലഭ്യമാകാത്തത് | Not obtained. |

## किमधिगतम् ।

| पठनप्रवर्त्तनानि । | स्वांशीकृतम् । | भागिकतया स्वांशीकृतम् । | प्रगतये प्रयत्नः करणीयः। |
|---|---|---|---|
| पाठभागस्य वाचनं कृतम् । | | | |
| प्रजापालनम् अधिकृत्य टिप्पणीलेखनं कृतम् । | | | |
| संवादः टिप्पणीलेखनं च कृतम् । | | | |
| राज्यभरणमधिकृत्य टिप्पणीलेखनं कृतम् । | | | |
| सूत्रं निर्धार्य विशदीकरणं कृतम् । | | | |
| सतिसप्तमीप्रयोगेण वाक्यपरिवर्तनं कृतम् । | | | |





आयकरविभागस्य १५० तमे वार्षिके (२०१०) प्रकाशितं चाणक्यस्य चित्रेण अङ्कितं नाणकम् ।


# ഭാരതത്തിന്റെ ഭരണഘടന

ഭാഗം IV ക

## മൗലിക കർത്തവ്യങ്ങൾ

**51 ക. മൗലിക കർത്തവ്യങ്ങൾ - താഴെപ്പറയുന്നവ ഭാരതത്തിലെ ഓരോ പൗരന്റെയും കർത്തവ്യം ആയിരിക്കുന്നതാണ് :**

(ക) ഭരണഘടനയെ അനുസരിക്കുകയും അതിന്റെ ആദർശങ്ങളെയും സ്ഥാപനങ്ങളെയും ദേശീയപതാകയെയും ദേശീയഗാനത്തെയും ആദരിക്കുകയും ചെയ്യുക;

(ഖ) സ്വാതന്ത്ര്യത്തിനുവേണ്ടിയുള്ള നമ്മുടെ ദേശീയസമരത്തിന് പ്രചോദനം നൽകിയ മഹനീയാദർശങ്ങളെ പരിപോഷിപ്പിക്കുകയും പിൻതുടരുകയും ചെയ്യുക;

(ഗ) ഭാരതത്തിന്റെ പരമാധികാരവും ഐക്യവും അഖണ്ഡതയും നിലനിർത്തുകയും സംരക്ഷിക്കുകയും ചെയ്യുക;

(ഘ) രാജ്യത്തെ കാത്തുസൂക്ഷിക്കുകയും ദേശീയസേവനം അനുഷ്ഠിക്കുവാൻ ആവശ്യപ്പെടുമ്പോൾ അനുഷ്ഠിക്കുകയും ചെയ്യുക;

(ങ) മതപരവും ഭാഷാപരവും പ്രാദേശികവും വിഭാഗീയവുമായ വൈവിധ്യങ്ങൾക്കതീതമായി ഭാരതത്തിലെ എല്ലാ ജനങ്ങൾക്കുമിടയിൽ, സൗഹാർദവും പൊതുവായ സാഹോദര്യമനോഭാവവും പുലർത്തുക, സ്ത്രീകളുടെ അന്തസ്സിന് കുറവു വരുത്തുന്ന ആചാരങ്ങൾ പരിത്യജിക്കുക;

(ച) നമ്മുടെ സമ്മിശ്രസംസ്കാരത്തിന്റെ സമ്പന്നമായ പാരമ്പര്യത്തെ വിലമതിക്കുകയും നിലനിറുത്തുകയും ചെയ്യുക;

(ഛ) വനങ്ങളും തടാകങ്ങളും നദികളും വന്യജീവികളും ഉൾപ്പെടുന്ന പ്രകൃത്യാ ഉള്ള പരിസ്ഥിതി സംരക്ഷിക്കുകയും അഭിവൃദ്ധിപ്പെടുത്തുകയും, ജീവികളോട് കാരുണ്യം കാണിക്കുകയും ചെയ്യുക;

(ജ) ശാസ്ത്രീയമായ കാഴ്ചപ്പാടും മാനവികതയും, അന്വേഷണത്തിനും പരിഷ്കരണത്തിനും ഉള്ള മനോഭാവവും വികസിപ്പിക്കുക;

(ഝ) പൊതുസ്വത്ത് പരിരക്ഷിക്കുകയും ശപഥം ചെയ്ത് അക്രമം ഉപേക്ഷിക്കുകയും ചെയ്യുക;

(ഞ) രാഷ്ട്രം യത്നത്തിന്റെയും ലക്ഷ്യപ്രാപ്തിയുടെയും ഉന്നതതലങ്ങളിലേക്ക് നിരന്തരം ഉയരത്തക്കവണ്ണം വ്യക്തിപരവും കൂട്ടായതുമായ പ്രവർത്തനത്തിന്റെ എല്ലാ മണ്ഡലങ്ങളിലും ഉൽകൃഷ്ടതയ്ക്കുവേണ്ടി അധ്വാനിക്കുക;

(ട) ആറിനും പതിനാലിനും ഇടയ്ക്ക് പ്രായമുള്ള തന്റെ കുട്ടിക്കോ തന്റെ സംരക്ഷണയിലുള്ള കുട്ടികൾക്കോ, അതതു സംഗതി പോലെ, മാതാപിതാക്കളോ രക്ഷാകർത്താവോ വിദ്യാഭ്യാസത്തിനുള്ള അവസരങ്ങൾ ഏർപ്പെടുത്തുക.

# കുട്ടികളുടെ അവകാശങ്ങൾ

പ്രിയമുള്ള കുട്ടികളേ,

നിങ്ങൾക്കുള്ള അവകാശങ്ങളെന്തെല്ലാമെന്ന് അറിയേണ്ടതില്ലേ? അവകാശങ്ങളെക്കുറിച്ചുള്ള അറിവ് നിങ്ങളുടെ പങ്കാളിത്തം, സംരക്ഷണം, സാമൂഹികനീതി എന്നിവ ഉറപ്പാക്കാൻ പ്രേരണയും പ്രചോദനവും നൽകും. നിങ്ങളുടെ അവകാശങ്ങൾ സംരക്ഷിക്കാൻ ഇപ്പോൾ ഒരു കമ്മീഷൻ പ്രവർത്തിക്കുന്നുണ്ട്. കേരള സംസ്ഥാന ബാലാവകാശസംരക്ഷണ കമ്മീഷൻ എന്നാണ് അതിന്റെ പേര്. എന്തെല്ലാമാണ് നിങ്ങൾക്കുള്ള അവകാശങ്ങൾ എന്നു നോക്കാം.

- സംസാരത്തിനും ആശയപ്രകടനത്തിനുമുള്ള സ്വാതന്ത്ര്യം
- ജീവന്റെയും വ്യക്തിസ്വാതന്ത്ര്യത്തിന്റെയും സംരക്ഷണം
- അതിജീവനത്തിനും പൂർണ്ണവികാസത്തിനുമുള്ള അവകാശം
- ജാതി-മത-വർഗ-വർണ്ണ ചിന്തകൾക്കതീതമായി ബഹുമാനിക്കപ്പെടാനും അംഗീകരിക്കപ്പെടാനുമുള്ള അവകാശം
- മാനസികവും ശാരീരികവും ലൈംഗികവുമായ പീഡനങ്ങളിൽ നിന്നുള്ള സംരക്ഷണത്തിനും പരിചരണത്തിനുമുള്ള അവകാശം
- പങ്കാളിത്തത്തിനുള്ള അവകാശം
- ബാലവേലയിൽനിന്നും ആപൽക്കരമായ ജോലികളിൽനിന്നുമുള്ള മോചനം
- ശൈശവവിവാഹത്തിൽനിന്നുള്ള സംരക്ഷണം
- സ്വന്തം സംസ്കാരം അറിയുന്നതിനും അതനുസരിച്ച് ജീവിക്കുന്നതിനുമുള്ള സ്വാതന്ത്ര്യം
- അവഗണനകളിൽനിന്നുള്ള സംരക്ഷണം
- സൗജന്യവും നിർബന്ധിതവുമായ വിദ്യാഭ്യാസ അവകാശം
- കളിക്കാനും പഠിക്കാനുമുള്ള അവകാശം
- സ്നേഹവും സുരക്ഷയും നൽകുന്ന കുടുംബവും സമൂഹവും ലഭ്യമാകാനുള്ള അവകാശം

## നിങ്ങളുടെ ചില ഉത്തരവാദിത്വങ്ങൾ

- സ്കൂൾ, പൊതുസംവിധാനങ്ങൾ എന്നിവ നശിപ്പിക്കാതെ സംരക്ഷിക്കുക.
- സ്കൂളിലും പഠനപ്രവർത്തനങ്ങളിലും കൃത്യനിഷ്ഠ പാലിക്കുക.
- സ്കൂൾ അധികാരികളെയും അധ്യാപകരെയും മാതാപിതാക്കളെയും സഹപാഠികളെയും ബഹുമാനിക്കുകയും അംഗീകരിക്കുകയും ചെയ്യുക.
- ജാതി-മത-വർഗ-വർണ്ണ ചിന്തകൾക്കതീതമായി മറ്റുള്ളവരെ ബഹുമാനിക്കാനും അംഗീകരിക്കാനും സന്നദ്ധരാവുക.

*ബന്ധപ്പെടേണ്ട വിലാസം:*

**കേരള സംസ്ഥാന ബാലാവകാശസംരക്ഷണ കമ്മീഷൻ**

ശ്രീ ഗണേഷ്, റ്റി.സി. 14/2036, വാൻറോസ് ജംങ്ഷൻ,

കേരള യൂണിവേഴ്സിറ്റി പി.ഒ, തിരുവനന്തപുരം – 34

ഫോൺ 0471 – 2326603

ഇ- മെയിൽ childrights.cpcr@kerala.gov.in, rte.cpcr@kerala.gov.in

വെബ്സൈറ്റ് : www.kescpcr.kerala.gov.in

ചൈൽഡ് ഹെൽപ്പ് ലൈൻ - 1098, ക്രൈം സ്റ്റോപ്പർ - 1090, നിർഭയ – 1800 425 1400

കേരള പൊലീസ് ഹെൽപ്പ് ലൈൻ - 0471 – 3243000/44000/45000

*online **R.T.E Monitoring : www.nireekshana.org.in***